मई तः जुलाई २०२४ पर्यन्तम्
वैशाख-कृष्ण-अष्टमी तः श्रावण-कृष्ण-एकादशी पर्यन्तम्
(वै-२०८१)

RNI
DELSAN/2013/50379
ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-११ संयुक्ताङ्कः- १०-१२



सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक शोध पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ ही शोध छात्रों एवं नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्य:- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

## "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२०९२०३६३

ISSN-2347-1565

मूल्यम्- ₹25 रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

मई तः जुलाई
२०२४ पर्यन्तम्

**वर्षम्-११-संयुक्ताङ्कः-१०-१२**

(वै.-२०८१)

**(वैशाख-कृष्ण-अष्टमी तः श्रावण-कृष्ण-एकादशी पर्यन्तम्)**

सम्पादकः
डॉ. अरुणकुमारझा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोजकुमारः

टंकण/आवरण/सज्जा
पूजागड़ाकोटी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | कवे न वेत्सि रामं मे | डॉ. एन् के. सुन्दरेश्वरन् | १ |
| ३. | भारतगौरवखण्डम्-चतुर्थखण्डम् | डॉ. देवी सहाय पाण्डेयः | ३ |
| ४. | तुरगः | डॉ. प्रीति आर. पुजारा | १३ |
| ५. | रक्तो रङ्गः | '' | १४ |
| ६. | गान्धर्वविवाहः | डॉ. गदाधरः त्रिपाठी | १५ |
| ७. | सूर्याष्टकम् | डॉ. सर्वेशकुमारमिश्रः | १६ |
| ८. | पर्यावरणसंरक्षणेऽसर्वकारीसंस्थानां भूमिका | श्री रविन्द्रः | १७ |
| ९. | कालिदास-साहित्ये पर्यावरणम् | डॉ. शशि तिवारी | २१ |
| १०. | अस्मीति (कोरोनाकालीना कथा) | डॉ. सुधाकरमिश्रः | २३ |
| ११. | स्वरसन्धिसंग्रहः | डॉ. आकाशः | २८ |
| १२. | शठेन शाठ्यम् | डॉ. केशवरामशर्मा: | ३५ |


**दिल्ली संस्कृत अकादमी**

(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)

DELHI SANSKRIT ACADEMY

(Govt. of N.C.T. , Delhi)

**ई-पत्रिका**

## प्रकाशक:

सचिव:

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाष: - 011-23635592, 23637798


## सदस्यताशुल्कम्

प्रति-अङ्कम् : ₹ 25 रूप्यकाणि

वार्षिकम् : ₹ 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकार:

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकार:

बैंकधनादेश: (डी०डी०), अन्तर्जाल (Online) माध्यमेन अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, online or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : www.sanskritacademy.delhi.gov.in

# सम्पादकीयम्

## अयि सुरभारतीसमुपकाः सुहृदयाः!

गीर्वाणवाणीप्रणयिनां संस्कृताध्येतॄणां विद्यार्थीनां समक्षं संस्कृतचन्द्रिका-मासिकी-बालपत्रिकायाः एकादशतमवर्षस्य मईतः जुलाई २०२४ पर्यन्तं प्रकाश्यमानस्य संयुक्तांकस्य (१०-१२) सम्पादनं कृत्वा सानन्दमुपहरामः। संस्कृतभाषायाः सेवायां सन्नद्धायाः दिल्लीसंस्कृताकादम्याः 'संस्कृतचन्द्रिकेति' मासिकी-बालपत्रिकायां बालमनोनुकूलाः उत्तमाः लेखाः प्रकाश्यन्ते। संयुक्तांकेऽस्मिन् अनेकाः बालरचनाः यथा डॉ. एन्.के.सुन्दरेश्वरन् महोदयस्य कविता 'कवे न वेत्सि रामं मे', डॉ. देवीसहायपाण्डेयस्य 'भारतगौरवखण्डम्' इत्यस्य काव्यस्य चतुर्थखण्डम्, डॉ. प्रीति आर. पुजारामहोदयानां कविता 'तुरंगः' एवं 'रक्तो रङ्गः', डॉ. गदाधरत्रिपाठिमहोदयानां कविता 'गान्धर्वविवाहः', श्री रवीन्द्रमहोदयानां एवं डॉ. शशितिवारीमहोदयानां पर्यावरणसंरक्षण-जागृतिमालक्ष्य लघुलेखः क्रमशः 'पर्यावरणसंरक्षणेऽसर्वकारीसंस्थानां भूमिका' एवं 'कालिदास-साहित्ये पर्यावरणम्', डॉ. सुधाकरमिश्रस्य कोरोनाकालाधारिता लघुकथा 'अस्मीति', डॉ. आकाशस्य व्याकरणाधारिता आलेखः 'स्वरसन्धिसंग्रहः', तथा च डॉ. केशवरामशर्ममहोदयानां एकांकीनाटकं 'शठेन शाठ्यम्' प्रकाशिताः। सर्वाः बालरचनाः विद्यार्थीनां जिज्ञासूपाठकानां कृते अतीव रोचकाः संस्कृते रुचिवर्धकाः वर्तन्ते। आशासे बालपत्रिकेयं बालकैः सोत्साहं पठिष्यत इति।

भावत्कः

**शकाब्दः - १९४६**

डॉ. अरुणकुमारझा

सचिवः

# कवे न वेत्सि रामं मे

-डॉ. एन. के. सुन्दरेश्वरन्

विश्ववन्द्य कविश्रेष्ठ श्रुतिस्मृतिविशारद।
कालिदास नमस्तेस्तु वाग्देवीसमुपासक ॥१॥

स्नुषा दशरथस्यैषा ज्येष्ठा जनकनन्दिनी।
रामस्य दयिता भार्या सीताहमभिवादये ॥२॥

यशस्ते सुकवे स्फीतं जातं काव्यैर्मनोरमैः।
त्रैलोक्ये भ्रमतात् शुभ्रं यावदाचन्द्रतारकम् ॥३॥

धर्मस्य वेत्सि श्रुतिमूलतां त्वं राज्ञः प्रजारञ्जनरूपताञ्च।
कवेर्मनः स्याद्गुदितानुसारि तदेतदाप्यात्थ परं हि तत्त्वम ॥४॥



वल्मीकजन्मा तातो मे ऋषिराद्यः कविर्मुनिः।
श्रद्धया परया नूनं सम्यगाराधितस्त्वया ॥५॥

स्वयं ब्रवीषि चैतत्त्वं पूर्वसूरिरिति ब्रुवन्।
तथापि शङ्के नैव त्वं जानीषे तस्य मानसम् ॥६॥

तथैव रामस्य महारथस्य महात्मनो मे दयितस्य भर्तुः।
शिरीषपुष्पोपममानसस्य हृदि स्थितं, सत्यमहं ब्रवीमि ॥७॥

जानाति रामस्य मनस्तु तातो ह्यस्पृष्टशङ्काकलुषं प्रशान्तम्।
कथं भवेन्मन्युरथास्य चित्ते धर्मे स्थितं तं भरताग्रजं प्रति ॥८॥

तातेन काव्ये रुचिरे गभीरे रामस्य शोको मयि चापि कामः।
पुनः पुनर्वर्णित एव तीव्रः, कथं स रामे वद मन्युमान् स्यात् ॥९॥

धर्मापदेशात्त्यजतश्च राज्यं माञ्चाप्यरण्यं नयतः पदातिम्।
नासीद् व्यथा यस्य न भीर्न शोकः कथं स रामः कलुषप्रवृत्तिः ॥१०॥

अहं तस्य प्रभावज्ञा भावज्ञा पृथिवीपतेः।
यशोगृध्नुर्न मे रामः धर्मे ह्यस्याहितं हि हृत् ॥११॥

अर्थमात्ररतानां त्वं भूभुजां सेवया भृशम्।
कवे न वेत्सि रामं मे केवलं धर्ममाश्रितम् ॥१२॥

-आचार्यः (सेवानिवृत्तः)
संस्कृतविभागः, कालिक्कट् विश्वविद्यालयः,
केरलराज्यम् -६७३६३५

# भारतगौरवखण्डम्-चतुर्थखण्डम्

-डॉ. देवीसहायपाण्डेयः

स्वर्गात्तु दिव्या महती विशाला
सुवन्दिता भारतवीरभूमिः।
सुशोभिता सागरमण्डलस्था
सिंहासनस्था महिषीव रम्या॥

धराधरो रम्यनगेश एष
हिमालयो दिव्यकिरीटमस्याः।
कश्मीरदेशः सुविशालभालो
विन्ध्यप्रदेशः कलमेखलेव ॥

आन्ध्रास्तु तस्यास्तमिलप्रदेशः
प्रक्षाल्यते सागरकिङ्करेण।
विभाति लंका तलदेशलग्ना
पादारविन्दाच्च्युतवारिबिन्दुः ॥

नागाश्च ये कूटकिरीटवन्त-
स्तुषारकर्पूरविलिप्तभालाः।
मेघोत्तरीयं विशदं विधाय
द्युलोकसभ्या इव ते विभान्ति॥

श्रीसत्त्वयुक्ता वनरम्यराजि-
र्विराजते पर्वतपादलग्ना।
सुस्वप्नमग्ना परिलक्ष्यते सा
रोमाञ्चजुष्टा विटपच्छलेन॥

पतन्प्रपातो विशदाम्बुयुक्तः
प्रतीयते पर्वतपादपृष्ठे।
स्त्रस्तं यथा शोभनमुत्तरीय-
मंसप्रदेशात्तु महीधरस्य॥

लतावितानास्तरवः प्रफुल्ला
युताश्च मिष्टैस्सुफलैर्मनोज्ञैः।
छायां सुशीतां वितरन्ति लोके
क्लेशं विशेषं पथिकस्य हृत्वा॥

अथ प्रभातप्रभया प्रकीर्ण-
मुषःपदालक्तकरम्यरागम्।
दधाति दिव्यं गगनं प्रसन्नं
तडागमध्ये वदनं विलोक्य॥

परागरागः परितः प्रकीर्णः
फुल्लेन हेमाम्बुजभास्करेण।
नीलाम्बरं रञ्जितमेव तेन
प्राच्यङ्गनायाः सुमुखं समस्तम्॥

आलोकलोकं विरचय्य लोके
कोकस्य शोकं शकलं प्रकुर्वन्।
करोति सूर्यः कलधौतवर्णं
कलप्रभातं कमलाकरञ्च॥

सितारविन्दस्य पुटे निषण्णः
करोति भृङ्गो मधुमिष्टपानम्।
मरालमाला मुदिता मनोज्ञा
तटाकतीरे रमते रसाला॥

विभिन्नवर्णा विहगा विभान्ति
वरं समस्ते परिपूरयन्ति।
प्रतीयते कोऽपि महोत्सवोऽस्ति
महाजनानामवली विचित्रा॥

उदेति संध्यासमये निशेशः
यथा महामण्डलमण्डलेशः।
स्वकौमुदीकुंकुमलिप्त एषः
विराजते वै गगने विशेषः॥

कृताङ्गरागः कुमुदप्रियोऽयं
चकोरवृन्दाय सुखं ददानः।
ज्योत्स्नोत्तरीयं परितः प्रसार्य
यावन्निशां नृत्यति मत्तचन्द्रः॥

मन्दस्मितेनैव विभाकरस्य
सुपूरितोऽयं सकलप्रदेशः।
शैवालतुल्यं लघुमेघखण्डं
व्योम्नस्तटाके तरतीति रम्यम्॥

व्योम्नस्तटाके विकचाब्जतुल्यं
विलोक्य रूपं शशिनस्तथैव।
तारागणानामवली विमुग्धा
मिलिन्दरूपा गगनाङ्गनेऽस्ति॥

अथ प्रदीप्तं शशिनं विलोक्य
तारास्तथा हेमपतङ्गतुल्याः।
आगत्य सद्यः परितः नभश्च
शशिप्रदीपं परिवारयन्ति॥

प्रतानितं यन्नभसो वितानं
घण्टेव चन्द्रः परिलम्बितोऽस्मिन्।
यावन्निशीथं न च कोऽपि जाने
के मौनघण्टां परिवादयन्ति॥

समुत्पतन्तं कलकूजनस्थं
गुल्मेषु सङ्घं चटकस्य पश्य।
विभाति चैवं मणिमौक्तिकस्य
माला विशाला त्रुटितातिदिव्या॥

नीडे निजे पादपकोटरस्थे
स्वचञ्चुना चञ्चुषु शावकानाम्।
भक्ष्यं क्षिपन् वै सुविहङ्गसङ्घ-
स्तनोति तत्र द्विगुणातिशोभाम्॥

श्यामां घटां व्योम्नि विलोक रम्यां
मुदान्विता या वकपंक्तिमाला।
समुत्पतन्ती हरतीति चित्तं
प्रतीयते सा कियती मनोज्ञा॥

आम्रस्य वृक्षे हरिते सुरम्ये
फलं स्वदन्तं हरिताभयुक्तम्।
दृष्ट्वा शुकं किंशुकरक्ततुण्डं
चित्तं प्रसन्नं नहि कस्य जातम्॥

शाखानुरक्तद्विजवृन्दमध्ये
वरासनस्थाः पिकपण्डिता ये।
अहर्निशं माधवरागिणस्ते
गायन्ति दिव्यं मधुवर्षिगीतम्॥

शिखाधरः शोभनकण्ठकेकी
पिच्छस्य वृत्तं विरचय्य नित्यम्।
करोति नृत्यं विपिने प्रमत्तः
ईषद्धि सञ्चाल्य सुनीलकण्ठम् ॥

उष्णीषरूपां लतिकां विधृत्य
तिष्ठन्ति वृक्षाः परितः प्रपश्य।
प्रसूनताटङ्कयुता लतास्ताः
नटन्ति रम्याः कटिचालनेन॥

सङ्गीतगीतं पिकचातकानां
तथाविधं तद्भ्रमरावलीनाम्।
संश्रुत्य सर्वं पशुपक्षिवर्गो
मुदान्वितोऽयं निखिलो निसर्गः॥

अश्वत्थवृक्षः सरसो रसज्ञः
श्रुत्वा सुगीतं सुविलोक्य नृत्यम्।
ददात्यहो शोभनसाधुवादं
पत्राणि ताला इव वादयित्वा॥

वरं सरस्तुङ्गतरङ्गसङ्गं
स्वाम्भोजनेत्रैरवलोक्य शोभाम्।
तरङ्गतालेन तटेन साकं
प्रमोदजालं प्रकटीकरोति॥

देशाङ्गणे ये ऋतवो नटन्ति
ते मुक्तहस्ता वितरन्ति शोभाम्।
सर्वस्य चित्तं ननु चोरयन्ति
क्रमेण तेषां रमणं प्रपश्य॥

ऋतोः रथस्थः ऋतुराज एषः
सुरम्यवेशः पिकवैणिकः सः।
विहारशीलः सरसो वसन्तो
वने समस्ते मधु वर्षतीति॥

वलाहकानां पटहं विधृत्य
तथा पताकां वकमालिकानाम्।
संचाल्य तीव्रं चपलाकृपाणं
करोति वर्षा जयघोषमुच्चैः॥

चन्द्रानने चारुतरे विलिप्य
ज्योत्सनाङ्गरागं मृदुलं मनोज्ञम्।
काशांशुका खञ्जनमञ्जुनेत्रा
आयाति सौम्या वरदा शरद्धि॥

गुणं स्पृशन् यस्तु वनानिलोऽस्ति
गुल्मेषु पूर्णः सशिलीमुखः सः।
वियोगिवृन्दं विकलं दुनोति
तनोति हर्षं श्रमिकेषु मध्ये॥

शाखावलम्बीखगनीडसङ्घो
विभाति वृक्षे वरवल्लकीव।
तस्य स्वनेनैव विमोहितास्ताः
नृत्यन्ति सर्पा इव वीचिमालाः॥

नगाधिराजस्य दयाद्रवोऽस्ति
झरन्ति यन्निर्झरनिर्झरिण्यः।
विभान्ति माला इव कण्ठलग्नाः
सिञ्चन्ति सस्यं पयसामृतेन॥

कूष्माण्डवल्लीवृतपर्णपृष्ठं
प्रलिम्पितं गोमयगन्धयुक्तम्।
गृहं पवित्रं कृषकस्य पश्य
सारल्ययुक्तं बहुदोषमुक्तम्॥

श्रीचन्द्रगुप्तश्च कुमारगुप्त-
स्तथैव हर्षो नृपभोजराजः।
राणाप्रतापः शिवराज वीरो
गोविन्दसिंहश्च सुभाषचन्द्रः॥

ऋषिर्महर्षिर्बहुसिद्धसङ्घा
व्रतेषु लग्ना व्रतिनो विशिष्टाः।
उदारसत्त्वा गुणिनो वदान्या-
स्त्यागे वरिष्ठा बहवो बभूवुः॥

शस्त्रेषु शास्त्रेषु समानदक्षा
नरा विशिष्टा इह पुण्यभूमौ।
प्रसूतिरस्या जगतो विभूति-
रेभिर्धरित्री किल कीर्तनीया॥

कात्यायनः पाणिनिगौतमौ तु
पतञ्जलिः शङ्करसायणौ च।
निम्बार्करामानुजबल्लभाश्च
आचार्यवर्गे बहवो बभूवुः॥



वाल्मीकिभासौ कविकालिदासो
भवाब्धिरत्ने भवभूतिमाघौ।
बाणाश्च दण्डी जयदेवनामा
सर्वे ललामा वरकाव्यकाराः॥

कबीरसूरौ तुलसीविशिष्टा-
स्ते जायसीकुम्भनकेशवाश्च।
रहीममीराऽलमभारतेन्दुः
प्रभृत्युदीर्णाः कवयो बभूवुः॥

घण्टाध्वनिर्देवगृहेषु नित्यं
श्रुतो ह्यजानः खलु मस्जिदेषु।
सौहार्दयुक्तौ रमजानरामौ
विलोक्य लोको बहुविस्मितोऽस्ति॥

विभिन्नधर्मेष्वविरोधभावं
सर्वत्रबन्धुत्वविचारचारम्।
अनेकतायामवलोक्य चैक्यं
विस्मायितस्तिष्ठति विश्ववर्गः॥

समन्वयं वीक्ष्य गुणे विभिन्ने
सहिष्णुतामुग्रपराक्रमञ्च।
एकस्थभूतौ हिमपावकौ च
वृत्तेन विश्वो विवृताक्षभूतः॥

छाया वृषेऽसौ वृषभध्वजस्य
छायातिथौ देवजनस्य दृष्टा।
चराचरेषु प्रभुरेव दृष्टो
बन्धुत्वभावस्तु जने जने च॥

सतां समुत्पादनभूमिरेषा
निसर्गशोभाजननाद् विशिष्टा।
स्वर्गापवर्गास्पदतां विलोक्य
स्वर्गोऽपि काञ्चिल्लघुतां प्रयाति॥

कारुण्यदानं सचराचरेभ्यः
सौहार्ददानं शुचिसज्जनेभ्यः।
द्वन्द्वस्य दानं खलगर्वितेभ्यो
दाने सदात्मा वरभारतस्य॥

विलोक्य सर्वं गुणगौरवञ्च
सत्त्वं महत्त्वं दृढशीलतत्त्वम्।
समर्चनायां भ्रमतः सदैव
श्रद्धाभिभूतौ खलु सूर्यचन्द्रौ॥

आम्रद्रुमः पल्लवपाणिमध्ये
विधाय वै मञ्जरिवर्तिकाश्च।
नम्रः प्रफुल्लोऽर्चति मातृभूमि
नीराजनाभिः सुफलेच्छुकः सः॥

सदैव सद्भ्यो नवनीतकल्प-
स्तथा खलेभ्यः कुशिलात्कठोरः।
सुभारतस्यैव निसर्ग एषः
सर्वेषु देशेष्वभिनन्दितोऽस्ति॥

प्रसूनतुल्यो मृदुलो मनोज्ञः
सुस्निग्धसौम्यो नवनीतकल्पः।
आपत्तिकालेऽनलतां प्रयाति
श्रीखण्डतुल्यः सरलस्वभावः ॥

ग्रीष्मो नृशंसः करुणां विहाय
प्रसार्य तापं दहतीति लोकम्।
विलोक्य चैवं ह्यनयं निहन्तुं
विरोधमुग्रं प्रकृतिः करोति॥

हिमाद्रिशृङ्गे तरलं जलं यत्
पाषाणतुल्यं दृढदृश्यमानम्।
विलोक्य तापं सरितः प्रवाहे
द्रवो द्रुतं धावति कूलमध्ये॥

कठोरतामार्दवकूलबद्धा
विचारधारा गतिमेति देशे।
यथा प्रफुल्लौ खलु रौद्रशान्तौ
रसौ मनोज्ञौ च समानवृन्ते॥

लताङ्गना या मधुमासमध्ये
तन्वङ्गभंग्या निपुणा नटन्ति।
प्रसूनमुष्ट्यां भरितैः परागैः
रसालकान्ताननुरञ्जयन्ति॥

ता एव लोकं परिपीडयन्तं
ग्रीष्मं महान्तं महिषं विलोक्य।
क्रुद्धामहाकुड्मलकुन्तहस्ताः
कालीवरुष्टाः खलु तर्जयन्ति॥

सत्याग्रहीचातक ऊर्ध्वचञ्चु-
र्जलान्यपीत्वा प्रणपूर्तिनिष्ठः।
विरोधशीलं स्वरुतं प्रसार्य
करोति स ग्रीष्मविरोधमुग्रम्॥

एवंविधं चेतनयातियुक्तो
जागर्तिशीलः खलु देश एषः।
कालप्रभावः कलिकालकोपो
निबद्धभूतः परतन्त्रतायाम्॥

गजेन्द्रदेहे बलमप्रमेयं
न्यूनो मृगेन्द्रोऽपि न विक्रमेषु।
संदृश्य तान् पिञ्जरपाशबद्धान्
जाता वितृष्णा हृदये न कस्य॥

दिनप्रकाशं प्रसभं प्रहृत्य
यदा तमिस्त्रा प्रबलातिभूता।
तथैव तैस्तामसवृन्दकैश्च
देशः समस्तोऽपि पराजितश्च॥

तेजोनिधानं तपनं प्रचण्डं
चण्डांशुभानुं ग्रसतीति राहुः।
दुर्धर्षकालो दुरतिक्रमश्च
ह्यनेन जातो स्वयमेव सिद्धः॥

व्यापारिसङ्घो ह्युदरम्भरिश्च
ह्यागत्य देशे समयं विलोक्य।
आहृत्य सत्तां छलछद्मसद्मा
बभूव सत्ताधर एव देशे ॥

अभूत संकीलितशक्तिदेशो
वैदेशिका ये कितवाः करालाः।
देशं प्रदेशं दुदुहुर्विशेषं
कंकालशेषो ह्यभवत्तु देशः॥

सम्पीड्यमानः सकलप्रदेशः
क्लेशो विशेषः पदमर्दितोऽयम्।
चकार चीत्कारमखण्डदेशः
क्लेशानशेषान् हर कोसलेश॥

गोविन्द कृष्णाच्युत लोकनाथ
भो विश्वकर्तः सकलार्तिहारिन्।
कुदासतावारिधिवीचिमग्नं
देशं समुद्धारय दीनबन्धो॥

गीताप्रदत्तं वचनं स्वकीयं
संस्मृत्य कृष्णो जगदार्तिहारी।
सम्प्रेषयामास तदा स्वदेशे
स्वपार्षदानामखिलं दलं तत्॥

ततस्तु सर्वे ज्वलिताग्निनेव
देशस्य भागे विविधे प्रजाताः।
प्रदीप्तिमन्तस्तमसो विरोधे
अलाततुल्या ज्वलिताः प्रचण्डाः॥

विशालसाम्राज्यमहार्णवे ते
सर्वे कराला वडवाग्नितुल्याः।
आरातिवृन्दे दहनास्तथैव
स्वातन्त्र्यसस्ये जलदा बभूवुः॥

साम्राज्यकुम्भीरमुखात्करालात्
गीर्णं स्वदेशं बहिरानयन्तः।
धन्यार्चिमालीव समर्चनीया
ऊर्जास्वलास्ते सुभटाः प्रचण्डाः॥

अभूत् स्वतन्त्रः परतन्त्रदेश-
स्तेषां प्रयासैर्बलविक्रमैश्च।
उन्मुक्तकण्ठा विहगस्यसङ्घाः
संलाप्य रागं मुदिता बभूवुः॥

मुदान्वितोऽयं तु ममापि कण्ठ
एकस्य वीरस्य सुवृत्तवृन्दम्।
गातुं सचेष्टः प्रकरोति यत्नं
भावाभिभूतस्तनुतामुपेक्ष्य॥

चापल्यमेवं कथितं स्वमत्या
भावोपलब्धिर्हृदयस्य सूक्तिः।
सद्यस्तदान्तर्ध्वनिनैव चोक्तं
हार्दं सुकथ्यं खलु पालनीयम्॥

सत्काव्यमेवं लिख सद्य एव
पुष्टा तवालम्बनभावभूमिः।
हिमालयाधारदृढत्वमाप्तः
काव्यातिरेकः पृथुलत्वमेति॥

आलम्बनेनैव बलेन काव्यं
स्वल्पैः प्रयासैर्भवतीतिसिद्धम्।
सुवत्ससंसर्गबलेन धेनोः
पयोधरेभ्यः स्त्रवतीति दुग्धम् ॥

आलम्बनं तत्तु कृतं त्वया हि
वीरव्रती यो महतां सुपूज्यः।
देशस्य हेतोर्बलिदानमस्य
शीर्षस्थलेख्यं हि सदेतिवृत्ते॥

शौर्येण संशाणितदिव्यवृत्तं
सम्प्राप्य शीलस्य सुयोगमेवम्।
काव्यान्तरिक्षे विशदेऽतिरूढं
कन्दो यथा वर्षति भावनीरम्॥

तेजस्तपस्याबलवीर्यसत्त्वं
चारित्र्यतत्त्वं करुणापरत्वम्।
देशानुरक्तिर्बलिदानभक्ति-
स्तेषां सुवृत्तं किल कीर्तनीयम् ॥

देशानुरागस्य तडागमध्ये
सुशोभितं स्वर्णसरोरुहाभम्।
दिव्यप्रभं त्यागपरागपूर्णं
गीतोपयुक्तं तु किलास्य वृत्तम्॥

नेत्रारविन्दं शशिसौम्यवक्त्रं
सुश्मश्रुणा मण्डितमञ्जुलोष्ठम्।
रदावदातप्रभया प्रकृष्टं
संगीयतां तच्चरितं विशिष्टम्॥

सोऽयं नरव्याघ्रविशालबाहुः
क्रोडाभिमानो हि बभूव मातुः।
स्वदेशहेतोर्हुतवानसूंश्च
ज्वलन् प्रतीको वरपौरुषस्य॥

स क्रान्तिदूतः सुकृतिप्रसूतः
स्वदेशभक्त्या भरितः प्रभूतः।
संगीयतां तच्चरितं प्रकृष्टं
यत्क्लैव्यसिन्धौ वडवाग्नितुल्यम्॥

उद्बाहुभूतस्त्वनयावरोधे
कदापि सेहे नहि वैरिवाक्यम्।
तस्य प्रचण्डो दृढबाहुदण्डौ
स्वातन्त्र्यपोतस्य सुकर्णभूतौ॥

क्रीता तु येनामरतैव लोके
प्रणार्पणेनैव पणेन तेन।
आसीज्ज्वलन् पौरुषपिण्डरूपः
प्रचण्डवीरः पवमानकल्पः॥

धृतैकवस्त्रः पिस्तौलशस्त्रः
वीरो वरिष्ठो वपुषा बलिष्ठः।
स्वदेशनिष्ठः स्वगुणैर्विशिष्ट-
स्त्यागी तपिष्ठः स हि लेखनेष्टः॥

स्कन्धौ सुपीनौ वृषभेण तुल्यौ
विशालवक्षस्तु शिलेव पुष्टम्।
भालोन्नतो दर्पितदीप्तदेहः
सुश्मश्रुणामण्डितमञ्जुलोष्ठः॥

हस्तो बलिष्ठः कटिपिष्टलस्थः
सुश्मश्रुणा दर्पितदीप्तवक्त्रः।
दीर्घोत्पलाक्षः पृथुपीनवक्षाः
प्रतीयते वीररसः समक्षम्॥

बलिष्ठदेहो दृढदीर्घबाहुः
सुश्मश्रुणाशोभितसौम्यवक्त्रः।
दिव्याननो दीपितदृप्तनेत्रो
मेघस्वनो दुन्दुभिदिव्यघोषः॥

संश्रुत्य नामैव भटस्य चास्य
गौराङ्गकास्ते मसितुल्यभूताः।
सूर्यास्तभावो नहि यस्य भूमौ
तदांग्लसाम्राज्यमनेन धूतम्॥

साम्राज्यवृक्षं विकरालभूतं
छेत्तुं कुठारः स बली बभूव।
शौर्येण संशाणितवज्रदेहः
आसीज्ज्वलन् पौरुषपिण्ड एव॥

दारिद्र्यपङ्के विकचाब्जतुल्यः
स्वसौरभं सः परितः प्रसार्य।
यथा शरीरं तपसा धृतं वै
चचार रामेण समं महात्मा॥

अखण्डसाम्राज्यसहस्रबाहुं
ममन्थ घोरं दमनात्मकं तम्।
कुठारकल्पेन हि पिष्टलेन
चचार वीरः स यथा कुठारी॥

धारित्रीमुद्रिकामध्ये रत्नरूपं हि भारतम्।
जगतः सकला शोभा हता जाता ह्यनेन च॥

गङ्गाया निर्मलं तोयं राजते रजतं यथा।
तेनैव सिञ्चिता रम्या मृत्तिका चन्दनायते॥

छत्रासते नगेशश्च पयोधिः किंकरायते।
सुमेखलायते विन्ध्यो रविश्च दर्पणयते॥

ग्रामग्रामनगर्यश्च ह्युपगङ्ग वसन्ति याः।
प्रहसन्ति सदा स्वर्ग गौरवेण मुदान्विताः ॥

सुरम्ये जाह्नवीतीरे धनधान्यसमन्वितः।
नौरिव भवसिन्धूनामुन्नावश्चादितः स्मृतः॥

उन्नयीकृतोऽनेन देश उच्चैर्गुणैस्सदा।
उन्नाव इति सन्नाम सार्थकं प्रतिपादितम् ॥

विन्ध्यहिमालयोर्मध्ये भूमिर्या गौरवान्विता।
आर्यावर्तेति विख्याता सा भूमिर्गुणगर्विता॥

उर इवार्यदेशस्य सर्वस्वं च महात्मनाम्।
शस्त्रशास्त्रमयी भूमिस्तीर्थोदकसमावृता॥

इतस्तु नातिदूरोऽस्ति सुस्थितश्चाश्रमो महान्।
रामायणकथाकर्तुः प्राचेतसमहामुनेः॥

सीतया विस्मृतं यत्र शूलं पतिवियोगजम्।
शार्दूलशावकैः सार्धमक्रीडतां कुशीलवौ॥

शृण्वन्तु सर्वे कृषकाः सुपूज्याः
नाथा धरायाः खलु सीरिणस्ते।
धरन्ति सीरं श्रमशोभिताङ्गा
ये सस्यवृन्दं परिपालयन्ति॥

मात्रीकृता येन धरा पुनीता
नभोऽस्ति पूज्यं जनकेन तुल्यम्।
वृक्षाः साखायः वृषभोऽस्ति बन्धुः
भूसेवकः सः खलु भूमिपालः॥

लोकाय दत्त्वा हि सदन्नकोषं
स्वयं क्षुधार्ता निवसन्ति गेहे।
ये उत्तमर्णा वसुधाखलिस्य
भूस्वामिनस्ते कृषका विपन्नाः॥

अङ्गारतुल्ये तपनेऽति घोरे
क्षेत्राणि कर्षन्ति हलेन नित्यम्।
नग्नाः सहन्ते हि समग्रशीतं
भूस्वामिनस्ते तु तपस्विनश्च॥

स्वेदीकृताः शोणितबिन्दवोऽपि
ह्युत्पादनार्थे श्रमयज्ञकुण्डे।
भूमिः समस्ता खलु युष्मदीया
भोज्यप्रदाता कृषकोस्ति लोके॥

आधारभूतं हि चराचरस्य
सस्यं भवद्भिः परिपालितं तत्।
ऋते भवद्भयो वसुधातलेऽस्मिन्
नान्ये भवेयुः खलु भूमिपालाः॥

सिंहासनानामवली समस्ता-
स्तासां समस्तः सुखभोगरागः।
न विस्मरेयुः भवतां प्रसादः
प्रासादमाला गजवाजिशाला॥

भालेषु येषां श्रमबिन्दुमाल्यं
स्कन्धेषु येषां हलपुष्टदण्डः।
मुष्ट्याममूल्यं श्रमरत्नमन्नं
भूमस्वामिनस्ते खलु सीरिणश्च॥

पातुं सुपोषं वसुधातलस्य
स एव लोके प्रथमाधिकारी।
स्वेदीकृतं शोणितमेव येन
विभूषिताङ्गः खलु मृच्चयेन॥

तत्रैव नीतः कृषकस्तु चैकः
कङ्कालशेषो गलिताङ्ग एषः।
वृद्धो विशेषः पलितश्च केशः
पाशेन बद्धः परिपीड्यमानः॥

न क्रीतदासी वसुधा नृपस्य
भूमिस्तु भूमावरदानमस्ति।
सुसेविता सा जननीव येन
स भूमिपालः खलु माननीयः॥

जातोऽधिकारः सहजातकानां
यथा हि मातुः पयसां सुपाने।
तथा धरायाः शुचिभोज्यभागे
समाधिकारः कृषकस्य जातः॥

अकर्मिणो ये ह्यघलिप्तनीचाः
भोगेषु लिप्ताः खलतुन्दिलाश्च।
न क्षेत्रधूल्या सुविभूषिताङ्गाः
भवेद् धरित्रीह कथं नु तेषाम्॥

ये चाांग्लवृन्दं तु विलोक्य तुच्छाः
पुच्छं समक्षं परिचालयन्ति।
ये ग्रामसिंहेन समाचरन्ति
न शोभते तेषु नृपालसंज्ञा॥

आकण्ठमग्नास्त्वघपङ्कमध्ये
कुमार्गिणः कुत्सितकर्मलग्नाः।
ये लुण्ठकानां सहयोगिनश्च
न शोभते तेषु नृपालसंज्ञा॥

विलासपूर्णेषु गृहेषु वासः
पिबन्ति दीनस्य हि शोणितं ये।
भूसेवकानां परिपीडिका ये
न शोभते तेषु नृपालसंज्ञा॥

न विस्मरेयुः ध्रुवसत्समेतत्
सुवीरभोग्यैव वसुन्धरेयम्।
न दुर्बलेभ्यो धरणीह जाता
नपुंसकेभ्यो नहि भोगसौख्यम्॥

अजानसुतानां तु बलिप्रदानां
वृन्दान्यनेकानि चरन्ति लोके।
सिंहीसुतेभ्यः सभया हि सर्वे
आचारतीतिं जगतः प्रपश्य॥

वंशीमुखाग्रे ग्रथिता शिलींध्री
नागो विशिष्टः पयसार्चितश्च।
क्रूरा ग्रहास्ते तु समाद्रियन्ते
सौम्यग्रहेभ्यो न हि दानपूजाः॥

क्षीणे शरीरेऽपि भुजङ्गवृन्दं
सम्पूजितं तद् विषकारणेन।
स किञ्चुलो यत्कृषकस्य मित्रं
तन्निर्विषत्वाद् वडिशे सुबिद्धः॥

केनोपलब्धो विनयेन बन्धो
निजाधिकारः कथयस्व लोके।
रामोऽपि तावन्नहि लब्धमार्गो
यावन्न हस्ते स दधार चापम्॥

शठेषु शाठ्यं हि समाचरेस्त्वं
कौटिल्यनीतिः कुटिलेषु कार्या।
तदार्जवं मा कुरु दुष्टमध्ये
मृदुर्हि लोके परिभूयतेऽस्मिन्॥

व्रजन्ति शीघ्रं हि पराभवं ते
ये बन्ध्यकोपा न जयं लभन्ते।
क्लीबो न लोके लभते श्रियं वै
प्रीतिर्न जाता खलु दुर्बलेभ्यः॥

निर्वेदभावेन कदापि सौख्यं
श्रेयो न लोके मधुरेण लब्धम्।
तदिक्षुदण्डस्य दशां प्रपश्य
प्रपीड्यते यत् खलु यन्त्रचक्रे॥

जातं प्रभाते बमकाण्डमेकं
निशानिशानाथविरोधपक्षे।
घनान्धकारो द्रुतविद्रुतश्च
तिरोहिताः कम्पिततारकाश्च॥

रविर्यदा वारिदरल्लकात्तु
गभस्तिदण्डो बहिरागतश्च।
चण्डांशु भक्तेषु दले विशिष्टे
सञ्चारिताशा च नवानुरागः॥



कोके तथा कोकनदे दले च
तडागवृन्दे विमले जले च।
पले पले कोमलशाद्वले च।
संव्याप्तरागो भुवनेऽखिले च॥

ये चाटुकारा रजनीकरस्य
चौराश्चकोरा मुखदर्शकास्ते।
ये चाश्रिताः कैरवपक्षकास्ते
तमोगुणास्तारकयूथपास्ते॥

रक्ताननं प्रेक्ष्य रवेश्च तेजो
हतौजसस्ते सकला बभूवुः।
गतामुखश्रीरखिला च तेषां
लुप्तप्रभास्ते खलु नैव रेजुः॥

-लवकुश नगरम्,
रामघाटः, अयोध्या,
उत्तर प्रदेशः -२२४१३३

# तुरगः

-डॉ. प्रीति.आर.पुजारा

चल मम तुरग! हे तबडक तबडक।
चल मम तुरग! हे तबडक तबडक॥

वनमतिसघनमतिविकराल-
मतुलमस्ति तव बाहुबलं हे।
शूरवीर! दृढमति! हे चल विक्रान्त!
चल मम तुरग! हे तबडक तबडक॥



तुङ्गः शृङ्गो मध्ये जलधिः
कालः करालस्सरलो न मार्गः।
त्रोटय सीमानं चल! बलवीर !
चल मम तुरग! हे तबडक तबडक ॥

भेदय गगनं चूर्णय विघ्नम्
शत्रुगणं विद्रावय तूर्णम् ।
पवनवाहन हे सररर ..सर त्वं
चल मम तुरग! हे तबडक तबडक॥

लक्ष्यं दृष्ट्वा धैर्यं धृत्वा
शत्रुञ्जय! वद हर हर शम्भो!
रणाङ्गणे नय मां सुभट! सुदक्ष!
चल मम तुरग! हे तबडक तबडक॥

# रक्तो रङ्गः



पुष्पाणि हसन्ति वृक्षेषु।
पुष्पाणां रङ्गो रक्तः सखि।
रङ्गोऽयं रक्तो रोचते मे॥



कपोतः प्राङ्गणे खेलति मे।
नयनस्य तस्य रङ्गो रक्तः।
रङ्गोऽयं रक्तो रोचते मे॥



वदति शुकः प्रियवचनानि।
रक्तश्चञ्चुः कर्षति मनः।
रङ्गोऽयं रक्तो रोचते मे॥

अनुजा हसति मधुरं सततम्।
तस्याः कपोलगर्तो रक्तः।
रङ्गोऽयं रक्तो रोचते मे॥



अम्बा क्रुध्यति यदा मह्यम्।
रक्ते नयने सखि भाययतः।
किन्तु रङ्गोऽयं रोचते मे॥



अग्रजो ददाति प्रेयस्यै।
पाटलपुष्पं रक्तं स्निग्धम्।
रङ्गोऽयं रक्तो रोचते मे॥

- संस्कृत विभागः,
डी.सी एम. आर्ट एवं कामर्स महाविद्यालयः
वीरग्रामम्, अहमदाबादम्, गुजरातः

# गान्धर्वविवाहः

-डॉ. गदाधरः त्रिपाठी



अव्यक्तोऽस्ति निरीहो हि मायया रहितः सदा।
कर्तुं किमपि न शक्तिर्हि तेन शक्तिर्निरूपिता।।१।।
माया जाया स्वयं पुरुषः पतिरूपेण कल्पितः।
अनयोर्जाता सृष्टिर्वै विवाहोऽपि च स्वीकृतः।।२।।
उद्वाहः परिणयश्चैव दारकर्म करग्रहः।
विवाहस्याष्टभेदा हि ऋषिभिः स्वीकृतास्तदा।।३।।
आश्रमेषु गृहस्थो हि वरणीयो भवति सर्वदा।
विधिसृष्टिरनेनैव संसरति सर्वथा सदा।।४।।
पित्रोः ऋणाद्भवति मुक्तिरर्हता च मोक्षे तथा।
उभयोर्मध्ये निष्ठा हि व्यवस्था सामाजिकी च वै।।५।।
विधिरेका विवाहस्य खलु क्षत्रियाणां कृते च वै।
स्वेच्छयया स्वीकरोति कन्याभर्ता तु निजजीवने।।६।।
एवमेव च पुरुषो वै कन्यां वृणोति निजेच्छया।
अधिकारश्च पुत्राय तथा भवतीति च निश्चयः।।७।।
दुर्दमनीया कामवृतिश्च युवकानां युवतीनां तथा।
स्वतन्त्रता व्यवस्थासहितास्यदेशस्य संस्कृतिर्हि वै।।८।।

-पुरानी बैलाई, मऊरानीपुरम्,
झांसी -२८५२०५
उत्तर प्रदेशः

# सूर्याष्टकम्

-डॉ.सर्वेशकुमारमिश्रः

सूर्यदेव! नमस्तुभ्यम् नमस्तुभ्यम् दिवाकर!।
शनीतात! नमस्तुभ्यम् देवदेव! नमोऽस्तु ते ॥१॥

सूर्यदेव! नमस्तुभ्यम् नमस्तुभ्यम् तु भास्कर!।
यमीतात! नमस्तुभ्यम् रविदेव! नमोऽस्तु ते ॥२॥

सूर्यदेव! नमस्तुभ्यम् नमस्तुभ्यम् तु भानवे!।
यमतात! नमस्तुभ्यम् ज्योतिपुंज! नमोऽस्तु ते ॥ ३॥

सूर्यदेव! नमस्तुभ्यम् दिनेशाय नमोऽस्तु ते ।
मार्तण्डाय नमस्तुभ्यम् प्रभाकर! नमोऽस्तु ते ॥४॥

सूर्यदेव! नमस्तुभ्यम् मतंगाय नमोऽस्तु ते।
अरुणाय नमस्तुभ्यम् दिवाकर! नमोऽस्तु ते ॥ ५॥

सूर्यदेव! नमस्तुभ्यं मित्रदेव! नमोऽस्तु ते।
विहंगम! नमस्तुभ्यम् आदिदेव! नमोऽस्तु ते॥६॥

सूर्यदेवनमस्तुभ्यं दिनकराय नमोऽस्तु ते।
भास्कराय नमस्तुभ्यं पतंगाय नमो नमः॥ ७॥

सूर्यदेवनमस्तुभ्यमादित्याय नमोऽस्तु ते।
मरीचये नमस्तुभ्यं खेचराय नमोऽस्तु ते ॥ ८॥

सूर्याष्टकमिदम् प्रोक्तम् मया सूर्य! पुनः पुनः।
साधय सर्वकार्याणि मयूरस्य यथा कृतम् ॥ ९॥

-विशिष्टाचार्यः
काशीकुंजः, जमुनीपुरम् प्रयागराजः -२२१५०५

# पर्यावरणसंरक्षणेऽसर्वकारीसंस्थानां भूमिका

-रविन्द्रः

**वाय्वाकाशजलादीनां, प्रदूषणनिवारणम्।**
**संरक्षणं च भूम्यादेः, पर्यावरणरक्षणम् ॥**

पर्यावृतिः पर्यावरणम्, यत् परितः आवृणोति आच्छादयति तत् पर्यावरणम्। ये मानवं परितः आच्छादयन्ति, मानव-जीवनं च प्रभावयन्ति ते पर्यावरणशब्देन गृह्यन्ते। तेषु वायुमण्डलं स्थलमण्डलं जलमण्डलं तथारासायनिकतत्त्वानां च संग्रहो वर्तते। एवं पर्यावरणं भौतिक-जैविक-तत्त्वानां संकलनेन भवति। भौतिकतत्त्वेषु मृतिका, जलं वायुः प्रकाशश्च सन्ति। जैविकतत्त्वेषु समस्तं जीव-जगद् वृक्ष-वनस्पतयश्च सन्ति।

मनुष्यान् परितः प्रसारितं वातावरणं पर्यावरणस्य परिधिः इति मन्यते। मनुष्याः जन्मतः मृत्युपर्यन्तं पर्यावरणे एव तिष्ठन्ति। पर्यावरणस्य माध्यमेन सः व्यक्तिगतसामाजिकक्षेत्रेषु विकासं करोति। यदि तस्मै उच्चं वातावरणं न दीयते तर्हि सः आदर्श मानवः, स्वस्थः नागरिकः भवितुम् न शक्नोति। यत् आवरणम् व्यक्तिं परितः भवति तत् पर्यापरणम् इति उच्यते। तस्याभावे सुखी जीवनम् असम्भवम्।

**पर्यावरणस्य परिभाषाः -**

**( १ ) वुडवर्थमहोदयस्यानुसारम्[१] -**

" पर्यावरण शब्द से अभिप्राय उन सभी बाहरी शक्तियों और तत्त्वों से है, जो व्यक्ति को आजीवन प्रभावित करते हैं।''

**( २ ) विश्वकोषस्यानुसारम्[२]-**

''पर्यावरण के अन्तर्गत उन सभी दशाओं, संगठन एवं प्रभावों को सम्मिलित किया जा सकता है, जो किसी जीवन अथवा प्रजाति के उद्भव, विकास एवं मृत्यु को प्रभावित करते हैं।''

**( ३ ) सी. सी. पार्क महोदयस्यानुसारम्[३] -**

''मनुष्य एक विशेष स्थान पर, विशेष समय पर जिन सम्पूर्ण परिस्थितियों से घिरा हुआ है, उसे पर्यावरण कहा जाता है। ''

**( ४ ) डगलस एवं रोमन हॉलैंड महोदयस्यानुसारम्[४] -**

''पर्यावरण उन सभी बाहरी शक्तियों एवं प्रभावों का वर्णन करता है, जो प्राणी जगत् के जीवन, स्वभाव, व्यवहार, विकास और परिपक्वता को प्रभावित करता है। ''

पर्यावरण प्रदूषणम् मानवः स्वक्रिया-कलापेन, अवशिष्ट-पदार्थानाम् ऊर्जायाश्च विमोचनेन यत् प्राकृतिकं सन्तुलनं दूषयति, तत् प्रदूषणम् इति निगद्यते।

१. डॉ. अखिलेशकुमारश्रीवास्तवः, डॉ. पतंजलिमिश्रः डॉ. वन्दनाश्रीवास्तवः, पर्यावरणशिक्षा, पृष्ठम् -२

२. डॉ. अखिलेशकुमारश्रीवास्तवः, डॉ. पतंजलिमिश्रः डॉ. वन्दनाश्रीवास्तवः, पर्यावरणशिक्षा, पृष्ठम् -३

३. डॉ. अखिलेशकुमारश्रीवास्तवः, डॉ. पतंजलिमिश्रः डॉ. वन्दनाश्रीवास्तवः, पर्यावरणशिक्षा, पृष्ठम् -२

४. डॉ. अखिलेशकुमारश्रीवास्तवः, डॉ. पतंजलिमिश्रः डॉ. वन्दनाश्रीवास्तवः, पर्यावरणशिक्षा, पृष्ठम् -२

**मुख्यप्रदूषणानि सन्तिः-**

१. वायु प्रदूषणम्।

२. जलप्रदूषणम्।

३. भूमि-प्रदूषणाम्।

४. ध्वनि प्रदूषणम्।

५. रेडियो-धर्मी-प्रदूषणं च ।

**पर्यावरणसंरक्षणम् -**

भारतीयदर्शनं प्राचीनकालात् प्रकृतिप्रधानं प्रकृतिसंरक्षणवादी च अस्ति पूर्वं भवति स्म। जलं, वायुः, अग्निः, वृक्षाः, जीवाः, भूमिः च अस्माकं धर्मग्रन्थेषु पूज्यन्ते। संस्कृतसाहित्ये पर्यावरणसंरक्षणविषयकं पर्याप्तं चिन्तनम् उपलभ्यते। वेदेषु, स्मृतिषु, पुराणग्रन्थेषु च पर्यावरण संरक्षणाय बहुधा निर्देशः प्राप्यते। तदत्र समासत उपस्थाप्यते।

अथर्ववेदे निर्दिश्यते यत् पर्यावरण-संघटक-तत्त्वेषु तत्त्वत्रयं प्रमुखं वर्तते । तानि सन्ति- आपः (जलम्), वाताः (वायुः), ओषधयः (वनस्पतयः) च। एतानि पर्यावरणं निर्मापयन्ति ।

**त्रीणि छन्दांसि कवयो वि येतिरे,**
**पुरुरूपं दर्शतं विश्वचक्षणम् ।**
**आपो वाता ओषधयः,**
**तान्येकस्मिन् भुवन आर्पितानि ॥**[५]
**यददो वात ते गृहे, अमृतस्य निधिर्हितः।**[६]
**युवं वायो सविता च भुवनानि रक्षथः।**[७]
**पृथिवी माता, द्यौष्पिता।**[८]
**अप्स्वन्तरमृतम् अप्सु भेषजम्।**[९]
**आपो विश्वस्य भेषजीः।**[१०]
**प्राणो वै वनस्पतिः।**[११]
**नमो वृक्षेभ्यो हरिकेशेभ्यः।**
**वनानां पतये नमः ।**
**ओषधीनां पतये नमः ।**[१२]

---

५. अथर्ववेदः १८.१.१७
६. ऋग्वेदः १०.१८६.३
७. अथर्ववेदः ४.२५.३
८. यजुर्वेदः २.१०-११
९. ऋग्वेदः १.२३.१९
१०. अथर्ववेदः ३.७.५
११. ऐतरेयब्राह्मणम् २.४
१२. यजुर्वेदः १६.१८,१९

प्रकृतेः एतेषां सर्वेषां घटकानां महत्त्वं च स्वीकृतम् अस्ति। कृतमस्ति एषः विचारः भारतीयशास्त्रेषु उल्लिखितप्रकृतिशब्दात् आगतः। तस्य सर्वेभ्यः घटकेभ्यः विना अन्यस्मिन्-अन्यस्मिन् न समाहितम् इति धारयति। कुटुम्बे समाविष्टाः सन्ति। कुटुम्बवत् तस्य परिवेशस्यापि विविधाः घटकाः सन्ति। तेषां मध्ये अन्तरक्रिया अनिवार्यमस्ति। बहुवारम् एतत्संक्रमणं पर्यावरणं हानिकारकं करोति। परिस्थितयः प्रति नेति। कदाचित् एतादृशाः कठिनाः परिस्थितयः प्राकृतिकघटकानां कारणेन केचन अजीवघटकाः उत्पद्यन्ते। इत्यस्मिन् प्रतिकूलपरिस्थितिभ्यः पर्यावरणस्य रक्षणार्थं परस्परसमन्वयस्य प्रक्रिया। स्वयमेव सुधारणव्यवस्थां प्रति नेति। विकासकाले ये जीवाः विद्यन्ते यदि ते तत् धारयन्ति तर्हि ते योग्याः मन्यन्ते। अत एव वर्तमानवातावरणे पुरुषः श्रेष्ठः मन्यते।

**पर्यावरणसंरक्षणेऽसर्वकारीसंगठनानां भूमिका-**

'NGO' इति एकः पर्यावरणवादस्य क्षेत्रे असर्वकारी संस्था अस्ति। एताः संस्थाः स्थानीयतया अन्तर्राष्ट्रियतया च कार्यं कुर्वन्ति, येन समकालीनसंसारे घटकानानां विविधपर्यावरणविषयाणां निवारणे तेषां महत्त्वपूर्णा भूमिका भवति । किञ्चित् असर्वकारी संस्थाः वर्तन्ते-

**( १ ) भारतीयपर्यावरणसोसायटी ( आईईएस )-**

**स्थापना**- १९७२ तमे वर्षे। **संस्थापकः**- सी०पी० रामास्वामी प्रतिष्ठानम्।

**कार्यम्**- १९७२ तमे वर्षे स्थापितायाः अस्याः संस्थायाः उद्देश्यं समग्ररूपेण पारिस्थितिकदृष्ट्या स्थिरं स्वनिर्भरं च प्रणालीं निर्मातुं वर्तते यत् संसाधनानाम् समानवितरणं भवति ।

**महत्त्वम्** -

आईईएस पर्यावरणशिक्षा, जैविविधतासंरक्षणं, सूचनाप्रसारणं, ठोस-अपशिष्टप्रबन्धननं, पारिस्थितिकी-प्रौद्यौगिकी, धरोहरसंरक्षणं च इत्येतयोः विषये अपि केन्द्रिता अस्ति। एषा संस्था स्थानीय राष्ट्रियस्तरयोः महत्त्वपूर्णपर्यावरणविषयेषु वैश्विकसमाधानं सूचयति ।

**( २ ) एनवायर्नमेंटलिस्ट फाउंडेशन ऑफ इंडिया-**

**स्थापना**- २००७ तमे वर्षे । **संस्थापकः**- श्री अरुणकृष्णमूर्तिः।

**कार्यम्** -एषा संस्था वन्यजीवसंरक्षणस्य, आवासस्य पुनर्स्थापनस्य च दिशि कार्यं करोति। देशे सर्वत्र स्वच्छजलस्य निवासस्थानानां पुनरुत्थानं प्रति संस्था केन्द्रीभूता अस्ति। तेषां मतं यत् वैज्ञानिकपद्धत्या स्वच्छजलपिण्डानां पुनर्स्थापनं सर्वाधिकंमहत्त्वपूर्णं भवति। ते २००७ तमे वर्षात् सफलतया एवं कुर्वन्ति। ते समुदायाधारितसहकारिसंरक्षणप्रयासानां माध्यमेन पुनर्स्थापनं प्रति निवसन्ति। आन्ध्रप्रदेशः, छत्तीसगढम्, दिल्ली, गुजरात, जम्मू-कश्मीर, कर्नाटक च इत्यादिषु २४ तः अधिकेषु भारतीयराज्येषु एषा संस्था कार्यं कुर्वन् अस्ति।

**महत्त्वम्** - वन्यजीवसंरक्षणाय, जलसंरक्षणाय च अस्याः संस्थायाः बहु महत्त्वं वर्तते।

**( ३ ) भारतीय वन्य जीव ट्रस्ट -**

**स्थापना** - १९९८ तमे वर्षे। **संस्थापकः** - श्री विवेकमेनन।

**कार्यम्**-तेषां ध्यानं पशुकल्याणं, वन्यजीवसंरक्षणं, पर्यावरणसंरक्षणं चास्ति। ते वन्यजीवानां तस्य निवासस्थानस्य च सफलतया संरक्षणं कुर्वन्ति ।

**महत्त्वम्** - देशे सर्वत्र कार्यं कुर्वतां १४० व्यावसायिकानां विस्तृतपरिधिं कृत्वा विलुप्तप्रजातीनां पुनः प्राप्तौ अपि सः महत्त्वपूर्णां भूमिका निर्वहति।

**( ४ ) एट्री -**

**स्थापना** - १९९६ तमे वर्षे

**कार्यम्** - अस्याः संस्थायाः लक्ष्यं संरक्षणं स्थायित्वं च विषये जागरूकताम् उपस्थापयितुं नियमानां प्रवर्तनं चास्ति। ते भूमिस्तरस्य पर्यावरणीयस्थायित्व हस्तक्षेपान्कार्यान्वितुं कार्यं कुर्वन्ति येन जनसामान्येषु जागरूकता प्रसारिता भवति।

**महत्त्वम्**- एषा संस्था विभिन्नेषु प्राकृतिकस्थानेषु यथा वनेषु, जलनिकायेषु इत्यादिपु व्यावहारिकं च कार्यक्रमं चालयति ।

**( ५ ) वनराई -**

**स्थापना** - १९८२ तमे वर्षे। **संस्थापकः** - पद्मविभूषणमोहनधारिया।

**कार्यम्**- एषा संस्था मृदाजलसंरक्षणं, वनीकरणम्, उद्यानविकासः, कृषकप्रशिक्षणं, कौशलविकासादिषु केन्द्रीभवति। सरलशब्देषु तेषां उद्देश्यं ग्रामीणविकासः पर्यावरणसंरक्षणञ्चास्ति।

**महत्त्वम्** - पर्यावरण संरक्षणे अस्याः संस्थायाः बहु-योगदानं वर्तते। तेषां कृते अनुमानतः ३७.१५ कोटिः लीटर जलस्य संरक्षणं कृतमस्ति। ते प्रतिवर्ष १ लक्षं वृक्षान् रोपयन्ति। अपशिष्टस्य प्रबन्धनार्थं सहस्राणि शौचालयानि, जलनिकासीरेखाः च निर्माणयन्ति।

**-शिक्षाशास्त्रीद्वितीयवर्षः**
**श्री ला० ब० शा० रा० सं०विश्वविद्यालयः**
**नव देहली- १६**
ravinderkaushik2002@gmail.com

# कालिदास-साहित्ये पर्यावरणम्

-डॉ. शशि तिवारी

कविकालिदासः संस्कृतसाहित्यस्य मूर्धाभिषिक्तो महाकविरस्ति। ध्वन्यालोकस्य रचयिता आनन्दवर्धनो लिखितवानस्ति- 'अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।' कविर्जयदेवस्तु कालिदासं 'कविकुलगुरुः' इत्युपाधिना विभूषितं कृतवानस्ति। एवं भूतस्य महाकवेः कालिदासस्य साहित्ये यशोराशिविषये गौरवविषये वा किमपि कथनमनावश्यकमिव प्रतिभाति। महाकविरयं महाकाव्य-गीतिकाव्यरूपकेति-त्रिविधकाव्यस्य कर्ताऽऽसीत्। तत्कृतितया प्रसिद्धाः ऋतुसंहार-मेघदूत-कुमारसम्भव-रघुवंश-मालविकाग्निमित्र-विक्रमोर्वशीयाभिज्ञानशाकुन्तलसञ्ज्ञाः सप्त ग्रन्था अस्माकं समक्षमुपलब्धाः सन्ति। एतेषां सम्यगनुशीलनेन विविधप्रकाराणि तद्वैशिष्ट्यान्यवलोक्यन्ते। नास्ति कश्चन विवादोऽत्र यत् कविरसौ भारतीयसंस्कृतिप्रतिष्ठापकः, सत्यस्य शिवस्य सुन्दरस्य च समुपासकश्चाऽस्ति। भारतीयदार्शनिकविचाराणां धार्मिकभावानां सांस्कृतिकमूल्यानां या प्रतिष्ठा तस्य ग्रन्थेषु दरीदृश्यते, तया कवेः व्यक्तित्वस्य जीवनदर्शनस्य च विविधाः पक्षाः प्रख्यापिता भवन्ति। पर्यावरणं प्रति कालिदासस्य जागरूकता, निजपर्यावरणसंरक्षणविषये तस्याभिनिवेशो वा एतेष्वन्यतमोऽस्ति।

कवेः कर्म काव्यं भवति। काव्यस्य मुख्यवस्तुनी स्तः रसानन्दौ। कवितायाः कृतेऽनुभूत्यभिव्यक्त्योर्महत्त्वं सुस्पष्टम्। अनुभूतेराधार आभ्यन्तरिकं बाह्यं च जगदस्ति। काव्ये सर्वत्र श्रेयस्त्वं प्रामुख्यं भजते। यतो हि काव्यस्य वर्ण्यविषयेषु मानवेन साकं प्रकृतिः पर्यावरणं च प्रत्यक्षतोऽप्रत्यक्षतो वा वर्णनीयविषयत्वेन संलक्ष्यन्ते। प्रकृतिर्मानवस्य आदिमा सहचरी अस्ति। 'प्र' उपसर्गपूर्वकात् कृ-धातोः क्तिन्प्रत्यये कृते प्रकृतिशब्दः सिध्यति, यस्याभिप्रायोऽस्ति 'प्रकृष्टा कृतिः' उत्कृष्टा सृष्टिर् वा। व्यावहारिकरूपेण वयं मानवेतरसृष्टिं प्रकृतिरिति ब्रूमः। 'परि' उपसर्गपूर्वकाद् 'आवरणम्' इति शब्दसंयोगेन 'पर्यावरण'-शब्दः सिध्यति तदनुसारं यत् 'परितः आवरणम् तदेव पर्यावरणम्। मानवः, तानि परितो व्याप्तानि तत्त्वानि अनिवार्यरूपेण भुनक्ति, तानि तस्य पर्यावरणमिति कथ्यन्ते। एवं प्रकारेण मानवस्य पर्यावरणे नदी-वन-पर्वत मेघ-प्रातः संध्या-सूर्य-चन्द्रादयः सर्वे सम्मिलिताः सन्ति। एतदतिरिक्तं जीवनस्य प्रतीकभूताः पशुपक्षिणोऽपि पर्यावरणान्तर्गता भवन्ति, यतस्तेऽपि प्रकृतेर-निवार्याण्यङ्गानि सन्ति। अमानवकृतं नैसर्गिकवैलक्षण्यं पर्यावरणस्य स्वाभाविकं स्वरूपं विद्यते।

कालिदासस्य प्रकृतिप्रेमः सुप्रसिद्धम् अस्ति। पर्यावरणानुरागश्च तस्य कृतिषु सुव्यक्तो वर्तते। महाकवेः समग्रं साहित्यं पर्यावरणसंरक्षणस्यैव भावनया आप्यायितमस्ति। वस्तुतः कालिदासस्य काव्यप्रतिभा प्रकृतिवर्णनेनैव मुखरिताभवत्। ऋतुवर्णनेन तस्य काव्यधारा विस्सृता, यतोहि साहित्य मर्मज्ञैस्तस्य प्रथमा कृतिः 'ऋतुसंहारम्'

इति सुनिश्चिता। काव्येऽस्मिन् मानवजीवनस्य ऋतूनां च पारस्परिकं परिपूरकं रूपं सुष्ठुतया वर्णितमस्ति। प्राकृतिकसौन्दर्यं प्रति सहजतया नितरां जागरुकः कालिदासः प्रकृतेः माङ्गलिक-रूपस्योपासकोऽस्ति। रम्यशान्ततपोवननदीतटपवनभ्रमरमृगकोकिलादीनां वर्णने कालिदासस्य मनोऽधिकं रमते। राजभवनेन साकं वनमपि तस्य पात्राणां कर्मभूमिर्विद्यते। आश्रमेषु तपोवनेषु च तेषां बहुविधाः क्रियाः संजाताः, याः काव्यघटनासु महत्त्वपूर्णा आसन्। आश्रमवासिनो जनाः तपोवननिवासिनः ऋषयश्च कालिदासदृष्ट्या तथैव वर्णनीयाः, यथा राजपुरुषा राजानो वा। कथयितुं शक्यते कतिपयस्थलेषु तपोवनं प्रति तस्य श्रद्धाभावना उत्कृष्टतां भजत इति। यथा अभिज्ञानशाकुन्तले स कथयति, 'राजरक्षितव्यानि तपोवनानि नाम।' अथ च 'आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः'। द्रष्टव्यमस्ति यदभिज्ञानशाकुन्तलस्य सप्ताङ्केषु पञ्च अङ्काः तपोवनप्रधाना एव सन्ति। रघुवंशस्य द्वितीयसर्गे कवी राज्ञो दिलीपस्य गोचारणकर्मणा सह वनस्य संश्लिष्टवर्णनं करोति। भारतीयसंस्कृतेः प्रतिनिधिभूतेन कविना कालिदासेन काव्येषु आश्रमसंस्कृति भव्यरूपेण प्रस्तुता इत्यस्ति निश्चप्रचम्। तपोवनस्य रमणीयं पर्यावरणं सर्वेषां कृते स्पृहणीयमिव, यतो हि प्रियंवदा कथयति 'न केवलं तपोवनविरहकातरा सख्येव।'

कालिदासस्य संवेदनशीला कविप्रतिभा पर्यावरणस्य प्रधानाङ्गेषु वृक्षेषु चेतनभावनाम् अनुभवति। केसरवृक्षको वातेरितपल्लवाङ्गुलीभिः शकुन्तलां त्वरयतीव (अभि० ४.१२)। सा वनवासबन्धुभिस्तरुभिरनुमत-गमना भवति (अभि० अङ्क ४.१२)। तेभ्यो वृक्षेभ्यः तस्याः कृते वनदेवताकरतलैराभरणानि दत्तानि (अभि० अङ्क ४.५)। वनेषु वृक्षेषु देवभावनाया आरोपणं खलु तेषां माहात्म्यमेव प्रदर्शयति। कालिदासदृष्ट्या वृक्षाः पुत्रवत् स्नेहेन परिपालनीया वर्तन्ते। निसर्गकन्याशकुन्तला लतासु वृक्षेषु सोदरस्नेहं धत्ते। सा प्रथमपुष्पोद्भवं पुत्रोत्सवमिव मन्यते-**'आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः।'** (अभि० ४.९)। कुमारसम्भवे पार्वत्यपि वृक्षकान् स्वयमेव सेचनघटैः सिञ्चति 'अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत्' (कुमार० ५.१४)। शकुन्तला वृक्षेषु प्रेम्णा प्रियमण्डना अपि किसलयं न गृह्णाति स्म, तेषु अकृतजलसेकेषु पानीयं ग्रहीतुं न यतते स्म-

**'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।'** अभि० ४.९

कालिदासस्य पर्यावरणविषयकं चिन्तनं प्रकृत्या सह मानवस्य घनिष्ठसम्बन्धे प्रतिष्ठितमस्ति। प्रकृते-र्विशालप्राङ्गणे विचरणशीलाः पशवः पक्षिणश्च मानववत् सुखदुःखयोः संवेदनाया अनुभवं कुर्वन्ति। कालिदासस्य सर्वाधिकप्रियः पशुः मृगोऽस्ति। स मनुष्यस्य नित्यसहचर इवास्ति। अभिज्ञाने आश्रमस्य मृगशावकः शकुन्तलाया निवसने सज्जते, काश्यपः तं तस्याः पुत्रकृतकं कथयति। कुमारसम्भवे पार्वती अरण्यबीजान् दत्त्वा हरिणानां पालनं करोति (कुमार० ५.१५)। प्राकृतिकसत्त्वान् प्रति मानवीयसंवेदनाया एक उत्कृष्ट आदर्शो रघुवंशमहाकाव्य उपलब्धो भवति राजा दिलीपोऽनुचरवत् श्रद्धाभावनया नन्दिनीधेनोः सेवां करोति -

**स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।**
**जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥** रघु०२.६

भ्रमराः कोकिला मयूराश्चक्रवाका हंसादयो बहवः पक्षिणः कालिदाससाहित्ये यत्र तत्र वर्णिताः, मानवसम्पर्के च प्रियरूपेषु सहजतया आयान्ति।

मानवस्य पर्यावरणे पर्वता विशिष्टस्थानभाजः सन्ति। कालिदासस्य ग्रन्थेषु हिमाद्रेर्वर्णनं विस्तृतमतिसूक्ष्मेक्षिकया च विहितम्। कुमारसम्भवं महाकाव्यं तु हिमालयवर्णनादेवाक्रान्तम्। मेघदूते वर्णिता यक्षवासभूमिरलका हिमालयस्थिता एवासीत्। विक्रमोर्वशीये उर्वशीपुरूरवसोः कुमारसम्भवे शिवाशिवयोः प्रणयलीला गन्धमादनपर्वते समपद्यत। कण्वमारीचप्रभृतीनां ऋषीणामाश्रमा हिमाद्रावेव प्रतिष्ठिताः। सर्वैरप्येभिरुल्लेखैः कवेः प्रभूतं हिमालयप्रेम व्यज्यते।

मानवस्य कृते तस्य पर्यावरणे अवस्थिता नद्यो महत्त्वं दधति महाकविः कालिदासो नदीवर्णने किमपि वैशिष्ट्यमावहति। कविना रघुवंशे गंगा, यमुना, सरयू, मेघदूते नर्मदाः कुमारसम्भवे आकाशगङ्गा च विशेषतया वर्णिता मानवीयसत्तायाः कृते परमोपादेयभूताः। रत्नाकरः सागरः, वर्षाकरः मेघः, शान्तिदायकः पवनः, शीतलं जलम्, मनोहरः सुगन्धः, मनोहारी चन्द्रोदयः, रक्तिमा सन्ध्या च महाकविना सरसतया चित्ताकर्षकरूपेतया विवर्णिताः। मानवीयपर्यावरणस्य अङ्गत्वेनैन तेषां उल्लेखो भवति, यतो हि कालिदासदृष्ट्यां पर्यावरणस्यावधारणा तु मानवस्य प्रकृतेश्च मञ्जुलसामञ्जस्य एव प्रतिष्ठितास्ति। कालिदासकाव्येषु पर्यावरणविषयकसन्दर्भा प्रकृतिचित्रणेन एवं ग्राह्या वर्तन्ते, किन्तु सर्वत्र ते पर्यावरणसंरक्षणस्य भावनया आप्यायिताः सन्ति।

महाकविः कालिदासः पर्यावरणवर्णनस्यैकमप्यवसरं न परित्यजति इत्यस्य निदर्शने अभिज्ञानस्य प्रसङ्गोऽयं सर्वोत्कृष्टो विद्यते। षष्ठेऽङ्के यदा विदूषकः दुष्यन्तं पृच्छति– 'चित्रे किमपरं लेखितव्यम्। राजा उत्तरे वदति–

**कार्या सैकतलीनहंसमिथुना स्त्रोतोवहा मालिनी**
**पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।**
**शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः**
**शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥** अभि० ६.१७

यदा मानवस्य वातावरणे नद्यः, पर्वताः, वृक्षाः, पशवश्च स्वाभाविकरूपेण समीपे तिष्ठन्ति, तदैव संस्तुत्यं पर्यावरणं भवति। कालिदाससाहित्ये पर्यावरणसंरक्षणस्य उत्तम आदर्शः प्रतिपादितोऽस्ति, नास्ति विषयेऽस्मिन् कश्चित् मतभेदः। अन्ते महाकविं कालिदासं स्मृत्वा सश्रद्धमहं पर्यावरणस्य सर्वविधं संशुद्धिं कामये –

**महाकविं कालिदासं वन्दे वाग्देवतागुरुम् ।**
**यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत् ॥** हलायुधः ॥

**–पता – ५४, साक्षर अपार्ट०, ए.३,**
**पश्चिम विहारः, नव देहली–११००६३**

स्वास्थ्यसम्बन्धितः, अस्वास्थ्यसम्बन्धितः, पलायनसम्बन्धितः, मृत्युसम्बन्धितश्च। यद्यपि अयं रोगः आविश्वं प्रसरितमासीत्। तथापि यस्मिन् देशे, प्रदेशे, नगरे, ग्रामे, गृहे वा तिष्ठति तस्यैव वैशिष्ट्यमपि तस्य कृते भवति। यस्य सम्बन्धिनः यत्र निवसन्ति स्म तेषां कृतेऽपि सम्बन्धिनां मनस्सु महती चिन्ता भवति स्म। यदि कश्चन सुखेन, हासमुखेन, सुवस्त्रेणाच्छिन्नं दृश्यते स्म तदा दृष्ट्वा कश्चन्नपि उत्साहः ह्रासो वा न भवति स्म। भारतीयसंस्कृत्युपनिबद्धाः ये षोडशसंस्काराः तेषां परिपालयितुं न कस्यापि कापि चेष्टा, यतो हि कश्चन यदि सुरक्षितो स्यात् तदैव कस्याप्याचारव्यवहारस्य परिपालनं सम्भवति। प्रोक्तञ्च आत्मानं सततं रक्षेद्। सर्वत्र यानानां, गमनागमनं निरुद्धं, चिटिकागवाक्षे न कश्चन सर्वकारीविक्रेता, यानेषु न कश्चन यात्री, भाण्डागारेषु वस्तूनि नष्टप्रायाणि, आपणे शरीराहारनिमित्तं विहाय न कस्यापि वस्तुनः विक्रयणं, विपणि उद्घाटने भयम्, वस्तुक्रयणे भयम्, क्रयणेपि प्रयोगे दुःखम्, कृत्स्नमपि भयाक्रान्तम्। यदि कश्चन शरीरं रोगाक्रान्तं, ज्वराक्रान्तं, काशाक्रान्तं तस्य कृते तु महती समस्या। तस्मिन् काले महारोगाणां कापि गणनैव नासीत्, अपितु अत्यन्तं प्रसिद्धं ज्वरशैत्यकाशादिकान्येव महत्त्वं प्राप्तानि। यत्र कुत्रापि चिकित्सालयेषु दर्शयितुमपि कश्चन् गच्छति स्म, तदा तत्रापि रोगिणः चिकित्सकाश्च परस्परं भयाक्रान्ता तिष्ठन्ति स्म। कर्तव्यं परमो धर्म इति मत्वा कार्यं सम्पादयनीयमिति दृष्ट्या चरन्ति स्म। शिक्षाक्षेत्रस्य तु महती दुर्दशा यतो हि शिक्षा तु सर्वेषां कृते अनिवार्या, तदर्थमेव लघुबालकादारभ्य वरिष्ठानां कृते शिक्षकादारभ्य सर्वकारपर्यन्तं चिन्तामग्नता दृष्टिपथमायाति स्म, यतो हि एकत्राध्ययनं द्वितीयतः धनदानं, तृतीयस्तु व्यवस्था भङ्गता, चतुर्थस्तु परीक्षापरिणामः, पंचमस्तु उपरि कक्षायां प्रवेशः, नवीनच्छात्राणां नूतनप्रवेशः, समेपि विषयाः जनानां मनसि उत्कोलाहलं जनयन्ति स्म। परन्तु भगवान् तु सर्वेषां कृते यत्कमपि मार्गं ददात्येव प्रोक्तञ्च ईश्वरेच्छा बलीयसी। उपरि उपरि हि बुद्धीनां चरन्ति ईश्वरबुद्धयः। इत्यादिवचनप्रामाण्यात् वैज्ञानिकेषु मस्तिष्केषु चलदूरभाषमाध्यमेन शिक्षापरीक्षाप्रोन्नतिप्रवेशादिकं जागरितवान्, तेन माध्यमेन सा व्यवस्था सम्पन्ना। तस्याधुनिकतनसमाजेऽपि देशाद् विदेशात् प्रदेशान्तराच्च गोष्ठीचर्चासत्रं सर्वमपि जातं, चलत्यपि। पारिवारिकीस्थितिस्तु इतोऽपि दुर्दशापूर्णा, यतो हि मन्ये यदि यस्मिन् कस्मिन्नपि परिवारे पञ्चजनाः पतिपत्नीपुत्रपुत्र्यादयः निवसन्ति तदा तेषु यदि पति शाकादीनि वस्तूनि क्रयणं कृत्वा आगच्छति स्म तदा पारिवारिकाः सदस्याः तत् वस्तु प्रति, तं प्रति च अत्यन्तनिरीक्षणदृष्ट्या पश्यन्ति स्म। वस्तूनामानयनानन्तरं स्थापनं गृहाद् बहिः, आदौ फेनकेन हस्तप्रक्षालनम्, पुनः वस्तूनां प्रच्छालनं, पुनः अग्निना निर्माणं, स्थाल्यादिकं प्रक्षाल्य दूरं दूरम् उषित्वा भोजनं पुनः भाजनानां परिष्कारार्थं कर्मकर्त्री कर्मकरो न आगच्छति स्म, सर्वमपि स्वयमेव पारिवारिकाः सदस्याः सम्पादयन्ति स्म। गृहे मार्जनीतः आरभ्य परिष्कारपर्यन्तं सर्वमपि स्वयमेव संपादितं भवति स्म। दौर्भाग्यं तस्मिन् काले ये तावत् चिकित्साक्षेत्रे कार्यं कुर्वन्ति स्म तेषां तु रोगीणां सेवनं, परिवारात् बहिः स्थितिः, पुत्रपुत्रीनां तु दूरादेव दर्शनं कुर्वन्ति स्म। यद्यपि तेषां कृते परिधानीयवस्त्रस्य पृथग् व्यवस्था आसीत् तथापि प्राणत्यागस्य यच्च भयं तस्य कृते किमपि विशिष्टं कवचन्नासीत्। बहिः देशे ये तिष्ठन्ति स्म तेषां ग्रामं प्रति पलायनं परन्तु पलायनान्तरमपि गृहे प्रवेशनिषेधः। यतो हि तस्य कृतेः चतुर्दशदिनं यावत् प्रभावो भवति स्म। तदा ते बहिः देशादागत्य सर्वकारपरिकल्पिते यस्मिन् कस्मिन्नपि स्थाने अथवा स्वकल्पिते व्यवस्थित स्थाने उषित्वा कालं

# अस्मीति

(कोरोनाकालीना कथा)

–डॉ. सुधाकरमिश्रः

**दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।**
**तत्रापि दुर्लभं मन्ये बैकुण्ठप्रियदर्शनम् ।।** श्रीमद्भागवतमहापुराणम्



धन्योऽयं भूलोकः, यत्र पृथिवीपाषाणवृक्षपर्वतनदीपुष्करिणीवनस्पत्यादयः राजन्ते। तान्याश्रित्य जीवन्ति जीवाः। जीवो जीवस्य जीवनमिति श्रीमद्भागवतमहापुराणवचनानुगुणं समेऽपि जीवाः जीवानामुपकाराय जीवन्ति। जीवो यदा जीवनं प्राप्नोति तदारभ्य केवलं जीवनमेवेच्छति अल्पं स्याद् भोजनं, न्यूनं स्याद्वस्त्रम्, स्याल्लघ्वासः, परन्तु जीवनममूल्यमिति। जीवनार्थे स्वकीयं शरीरस्य विकृतमङ्गमपि कर्तनं कृत्वा बहिः कारयति। गच्छेद्धनं, गच्छेच्च वनं, न गच्छेज्जीवनमिति। सर्वविधेच्छाविषयं जीवनम्। अतीवममूल्यममिति। तात्पर्यं तस्य जीवनस्य किमपि परिवर्त्यन्नास्तीति। संसारस्य यदि किमपि महद्भयमस्ति तत्तु मृत्युभयम्। यस्माद् भयात् देवकिन्नरगन्धर्वयक्षराक्षसपिशाचादयोऽपि आक्रान्ताः, तस्मात्तु सामान्यमनुष्याणां का कथा। सदैव यत्नशीलाः मनुष्याः, सामान्य-प्राणिनोऽपि मृत्युमपसारयितुं यतन्ते। परन्तु तद्भयं तु न परिहारयोग्यम् तथापि यतते एव मानवः। सत्यपि नाना यत्ने परिवर्तनमेव जीवनम्, यस्य कृते शास्त्रेषु मृत्युरिति शब्दः तस्य गीतादिषु परिवर्तन इति व्यवहारो दृश्यते। संसार इति शब्दस्य व्युत्पत्तिरपि संसरतीति संसारः, निरन्तरं गच्छतीति जगत्। अस्तु सर्वमपि लौकिकं दार्शनिकं च व्याख्यानं भिन्नं, परन्तु सामान्यं जीवनं तु आहारविहारव्यवहारादिकमेव जीवनमिति। अस्मिन्नपि जीवने जनानां सामान्यरूपेण आनन्दानुभूतिस्तु भवत्येव। परन्तु मध्ये मध्ये प्रकृतिरपि मानवानां कृते प्रेरणां प्रददाति। इमाः महामारी इत्याख्याः समस्याः लघुबृहदाकारेण सततं चलन्त्येव। तस्मिन्नेव क्रमे २०२० तमे ईस्वीये वर्षे कोरोना महामारी अपि आगता। सत्यमिदमपि अद्भुतमेवासीत्। यत्र न कश्चन कमपि द्रष्टुमिच्छति। न स्प्रष्टुमिच्छति। न वक्तुमिच्छति। न हि गन्तुमिच्छति। न हि आगन्तुं ददाति। इतोऽपि न हि चौर्यं कर्म, न हि त्यागकर्म, सर्वमपि शास्त्रसम्मतं जीवनं प्रतिभाति स्म। परन्तु सर्वमपि आरोपितमेव। परिस्थितिरीदृशी आसीत् यत् स्वस्मादपि भयं प्राप्नुवन्ति स्म। कुतस्कुतः प्रतिदिनं नवीनः समाचारः आगच्छति स्म। सोपि समाचार अद्भुतमेव।

यापयन्ति स्म। मध्ये तु भारतसर्वकारपक्षतः रेलयानवायुयानवैयक्तिकयानादिषु गमनागमनमपि निषिद्धमपि आसीत् एकस्य देशस्य अन्यस्मिन् देशे वायुयाननिषेधः, प्रदेशस्य प्रदेशान्तरे यानप्रवेशनिषेधः, गृहाद् गृहान्तरे प्रवेशनिषेधः, सर्वमपि आश्चर्यपूर्णमासीत्। कर्मकर्तृव्यापाराश्च अवरुद्धाः। येन केनापि रूपेण भोज्यपदार्थं प्रति जनानां चिन्ता भवति स्म, परन्तु तत्रापि सन्देहः, यत् यद् वस्तु मया आनीतं तद् सामान्यं कृमियुक्तं वा। भोजननिर्माणे प्रयुक्तानां वस्तूनां प्रत्यपि प्रतिमुहूर्तं सन्देहः, यतः कुतो वा यस्य कस्यापि कृते प्रवेशस्तु न जातः, एवं रूपेण जीवनं प्रतिक्षणमेव संशयग्रस्तमिति। गमने सन्देहः, आगमने संदेहः। दर्शने सन्देहः। कथने सन्देहः। परन्तु समस्या तत्र भवति स्म यदा कश्चन अतीव परिचितोऽपि यदि दृष्टिपथमायाति स्म, तदा तस्य कृते केन रूपेण स्वकीयां श्रद्धां प्रकटयामीति महती समस्या। यद्यपि भारतीयसांस्कृतिकग्रन्थेषु प्रणामस्य बहुधा प्रकाराः प्रदर्शितास्सन्ति तथापि भारतसर्वकारपक्षतोऽपि केवलमेकाङ्गस्याश्रयणं जनाः कुर्वन्ति स्म, प्रणाम इति। तेन स्पष्टमिदं जातं यत् उपनिषदि यत् प्रोक्तमस्ति "**न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनः कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवति, आत्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रियाः भवन्ति, आत्मनस्तु कामाय पुत्राः प्रियाः भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति, आत्मनस्तु कामाय वित्तं प्रियं भवति**"। बृहदारण्यकोपनिषद् (२.४.५) इतोऽपि आत्मानं सततं रक्षेद् इति वचनमपि सार्थकतां द्योतितवान्। समेऽपि जनाः आत्मरक्षणतत्परा एव दृष्टिपथमायान्ति स्म। निराधारस्यास्य जगतः यदि कश्चन्नाधारो विद्यते चेत् तत्तु भगवानेव। प्रोक्तमपि–जगन्नाथाय ते नमः। विश्ववन्द्याय नमः। तदर्थं शास्त्राण्यधिकृत्य निर्मितं चलचित्रं महाभारतं, रामायणं, श्रीमद्भागवताश्रितं श्रीकृष्णचरितादिकमपि दूरदर्शनमाध्यमेन गृहाभ्यन्तरे उषित्वापि जनाः लोचनलोचितं कृतवन्तः। इतोऽपि यदा कश्चन कदा कुत्रापि गच्छति स्म, रेलयानस्थले, वायुयानस्थले वा तदा तस्य कृते यच्च परीक्षणयन्त्रं स्थापितमासीत् परीक्षकश्च नियुक्तो आसीत्, तदा गन्तॄणां मनसि सततं चिन्ता भवति स्म यन्त्रं किं वदिष्यति। परन्तु प्राणरक्षार्थं यत्किमपि कर्तव्यमेव यतो हि कर्म स्वाभाविकं धर्मः। प्रोक्तं च वेदे जातु न तिष्ठत्यकर्मकृत। तदानीं तु गमनागमने कस्यापि मनसि न उत्साहः, स्वागताय वा न कश्चित प्रयासः, सर्वमपि दूरत एव। इतोऽपि आश्चर्यं यत् स्थानप्राप्तेऽपि दूरादेव प्रणामः, भोजनदानं, कथनोपकथने मुखाच्छादकस्य प्रयोगः, यदि कश्चन सामान्यदर्शितो भवति स्म तदा स्वपरिचयप्रदानात्प्राग् तस्य परिचयोऽपि असम्भवो भवति स्म। तस्मिन् काले ज्ञानस्य, कर्मणः, ध्यानस्य, प्राप्तेर्वा कापि चिन्ता मनसि न भवति स्म अपितु प्राणाः कथं सुरक्षितास्स्युरिति सर्वेषां चिन्ता। तस्य प्रत्यक्षं प्रमाणं यत् दूरदेशेऽपि स्थिता अपि जनाः आत्मत्राणार्थं स्व ग्रामं प्रति, स्वदेशं प्रति, स्वजनं प्रति वा पलायनमकुर्वन्। यद्यपि बहूनां यात्राकरणकालेऽपि मृत्युर्जाता। तथापि सुरक्षार्थं तु ते यतितवन्तः। व्यापारः, प्रयासः, अहंकारः, जनकृतवैशिष्ट्यं, भौतिकप्रेम्णः, किं महत्त्वं सामान्यत्वं वा सर्वमपि स्पष्टं जातम्। सर्वासामुन्नतीनां यदि एकस्मिन् पक्षे अवनतिः तत्रैव प्रकृतिकृते, वायुकृतपरिष्कारः, नदीनां जलवैशिष्ट्यं, वृष्टितत्त्वस्याद्भुतं रूपं, सूर्यातपस्य वैशिष्ट्यं सर्वमपि आसामान्यं स्वरूपमपि जनानां कृते स्थिरं जातम्। शिक्षाजगत्यपि महत्परिवर्तनं जातम् अन्तरिक्षमार्गादेव ग्रन्थानां प्राप्तिः, अन्तरिक्षे एव प्रेषणं सर्वमपि नवीनं रूपं धृतवत्। चिकित्सकानां मते कोरोना

सर्वेभ्योऽपि यत्किमपि दत्तवान् एव। यदि कश्चन अध्ययनं विना उत्तीर्णः, तर्हि कश्चन मरणात् परलोकं प्राप्तवान्, कश्चन स्मृतिं त्यक्तवान्। कश्चन जीविकामत्यजत्। कश्चन परिवारयुक्तश्चेति तर्हि कश्चन संसारवियुक्तो जातः। कश्चन तस्य समस्य दुरुपयोगमकरोत् कश्चन् दानज्ञानविज्ञानप्रदानमाध्यमेन सदुपयोगमपि साधितवान्। सर्वेषां कर्मणां निषेधपक्षः विधेयपक्षद्वयं भवतः, परन्तु प्रायबाहुल्य पक्षस्याश्रयणं भवति। अस्मात् कृतेः हानिरधिका, लाभस्तु न्यूनः। कोरोनामधिकृत्य बहूनि काव्यानि, शतकानि, महाकाव्यानि वा जातानि। तस्योपरि राष्ट्रिया चर्चागोष्ठी, अन्ताराष्ट्रियागोष्ठी, कार्यशालादीनां च बहुधा आयोजनमपि जातम्। तस्य नाम्नः मनसि भयं भवति स्म। अद्यापि जनानां मनसि आक्रान्तिस्तु अस्त्येव। इयं कथा स्वानुभूतिमाश्रित्य मया लिखिता।

**दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम्।**
**सत्यपूतां वदेद् वाचं मनः पूतं समाचरेत् ॥** (श्रीमद्भागवतमहापुराणम् ११.१८.१६)



**-सहाचार्यो व्याकरणविभागे**
**श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः,**
**कोलकाता, पश्चिमीबङ्गप्रदेशः**
sudhakarmishra.vyakaran@gmail.com

# स्वरसन्धिसंग्रहः

-डॉ. आकाशः

वर्णानाम् अतिशयितः सन्निधिः सन्धिः। एकस्य वर्णस्य उच्चारणानन्तरम् अपरस्य वर्णस्य उच्चारणम्, ततः तृतीयस्य, ततः चतुर्थस्य इत्येवं क्रमेण शब्दोच्चारणं भवति। द्वयोः वर्णयोः उच्चारणयोः मध्ये अर्धमात्राकालात् अपि अधिककालेन व्यवधानं यथा न भवेत् (द्वयोः वर्णयोः उच्चारणयोः मध्ये अर्धमात्राकालः सह्यते इत्यर्थः) तथा उच्चारणमेव सन्धिः। एवं सन्धौ सति कदाचिद् वर्णस्य आदेशादिकं भवति। इत्थम् आदेशादिकम् एव सन्धिकार्यम् इत्युच्यते। इदं च सन्धिकार्यं पदस्य मध्ये पदयोर्मध्ये वा सम्भवेत्।

यथा- १- यदि+अपि = यद्यपि।

२- विष्णो+ए = विष्णवे।

अत्र आद्ये पदस्य मध्ये, द्वितीये पदयोर्मध्येसन्धिकार्यं प्रवृत्तम्। लोके तु सन्धिकार्यमित्यर्थे सन्धिरिति व्यवहारः क्रियते।

**सन्धिभेदः-**

मुख्यरूपेण सन्धयस्त्रिविधाः-

१. स्वर (अच्) सन्धिः।

२. व्यञ्जन (हल्) सन्धिः।

३. विसर्गसन्धिश्चेति।

वैयाकरणाः सन्धीन् पञ्चभिः प्रकारैः विभजन्ते। अच्सन्धिः, प्रकृतिभावः, व्यञ्जनसन्धिः, विसर्गसन्धिः, स्वादिसन्धिश्चेति।

प्रकृतिभावः स्वरसन्धौ, स्वादिसन्धिः विसर्गसन्धौ च अन्तर्भावितः अत्र इति ज्ञेयम्।

**स्वर (अच्) सन्धिः**

अच् इत्युक्ते स्वराः। स्वरेषु परस्परं जायमानानि वर्णपरिवर्तनानि अच्-सन्धयः।

उदाहरणम् - 'रमा+ईशः' अत्र आकार-ईकारयोः स्थाने एकारः भवति। तेन 'रमेशः' इति रूपं सिध्यति।

स्वरसन्धयोः भेदाः-

स्वरसन्धयोऽष्टविधाः। तथा हि १. सवर्णदीर्घसन्धिः, २. गुणसन्धिः, ३. वृद्धिसन्धिः, ४. यण्सन्धिः, ५. अयादिसन्धिः, ६. पूर्वरूपसन्धिः, ७. पररूपसन्धिः, ८. प्रकृतिभावः।

अत्र-

१. यण्सन्धिः।

२.अयादिसन्धिः।

(एतयोः द्वयोः सन्ध्योः पूर्वस्य एकस्यैव वर्णस्य स्थाने आदेशो भवति।)

३. गुणसन्धिः।

४. वृद्धिसन्धिः।

५. सवर्णदीर्घसन्धिः।

६. पूर्वरूपसन्धिः।

७. पररूपसन्धिः।

(पञ्चस्वपि एतेषु सन्धिषु पूर्वस्य परस्य च स्थाने एकादेशा भवति।)

८. प्रकृतिभावः। (अत्र आदेशाभावः।)

**१. सवर्णदीर्घसन्धिः-**

सूत्रम्- **'अकः सवर्णे दीर्घः'**[१]

अ,आ इत्येताभ्याम् 'अ,आ' इत्येतयोः परयोः आकारः, 'इ, ई' इत्येताभ्याम् 'इ, ई' इत्येतयोः परयोः ईकारः, 'उ,ऊ' इत्येताभ्याम् 'उ, ऊ' इत्येतयोः परयोः ऊकारः, 'ऋ' इत्यस्मात् 'ऋ, लृ' इत्येतयोः परयोः ऋकारः, पूर्वपरयोः स्थाने एकादेशो भवति । यथा-

(१) हिम + आलयः= हिमालयः।
विद्या + आलयः= विद्यालयः।
तथा + अपि = तथापि।

(२) गिरि + ईशः = गिरीशः।
श्री + ईशः = श्रीशः।
पठति + इदम् = पठतीदम्

(३) गुरु + उपदेशः = गुरूपदेशः।
भानु + उदयः = भानूदयः।
लघु + ऊर्मिः = लघूर्मिः।

(४) होतृ + ऋकारः = होतृकारः।
पितृ + ऋणम् = पितृणम्।

**२. गुणसन्धिः-**

गुणसंज्ञाविधायकसूत्रम्- 'अदेङ्गुणः'[२]

अर्थात् अत् एङ् च गुणसंज्ञं स्यात्।

**विधिसूत्रम्- 'आद्गुणः'**[३]

अर्थात् अवर्णादचि परे पूर्वपरयोरेको गुणः आदेशः स्यात्संहितायाम् ।

अ, आ इत्येताभ्यां वर्णाभ्याम् इ, ई इत्येतयोः परयोः एकारः, उ, ऊ इत्येतयोः परयोः ओकारः, ऋ,ॠ इत्येतयोः परयोः अर्, लृकारे परे अल् च पूर्वपरयोः स्थाने एकादेशो भवति। यथा-

(१) महा + ईशः = महेशः।
गण + ईशः = गणेशः।
रमा + ईशः = रमेशः।

(२) पर + उपकारः = परोपकारः।
महा + उत्सवः = महोत्सवः।
हित + उपदेशः = हितोपदेशः।

(३) महा +ऋषिः = महर्षिः।
राज + ऋषिः = राजर्षिः।
ग्रीष्म + ऋतुः = ग्रीष्मर्तुः।

(४) तव + लृकारः = तवल्कारः।

---

१.अष्टाध्यायी- ६/१/१०१
२.अष्टाध्यायी- १/१/२
३.अष्टाध्यायी- ६/१/८७

### ३. वृद्धिसन्धिः-

**वृद्धिसंज्ञाविधायकसूत्रम्- 'वृद्धिरादैच्'**[४]

अर्थात् आदैच्च वृद्धिसंज्ञः स्यात्।

**विधिसूत्रम्-'वृद्धिरेचि'**[५]

अर्थात् आदेचि परे वृद्धिरेकादेशः स्यात्।

'अ,आ' इत्येताभ्यां वर्णाभ्याम् 'ए ऐ' इत्येतयोः परयोः 'ऐ' कारः, 'ओ,औ' इत्येतयोः परयोः 'औकारः' च, पूर्वपरयोः स्थाने एकादेशो भवति।

(१) अत्र + एकः = अत्रैकः।
पश्य + एतम् = पश्यैतम्।
सा + एषा= सैषा।
राज + ऐश्वर्यम् = राजैश्वर्यम्।

(२) तण्डुल + ओदनम् = तण्डुलौदनम्।
जल + ओघः = जलौघः।
महा + ओषधिः = महौषधिः।
देव + औदार्यम् = देवौदार्यम्।

**विशेषः -**

**सूत्रम्- 'उपसर्गादृति धातौ'**[६]

अर्थात् अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । यथा-

उप + ऋच्छति = उपार्च्छति।

**सूत्रम्- 'वा सुप्यापिशलेः'**[७]

अर्थात् अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशो वा स्यात् । यथा-

प्र + ऋषभीयति = प्रार्षभीयति/ प्रर्षभीयति। उप + लृकारीयति= उपाल्कारीयति/उपल्कारीयति।

**सूत्रम्- अक्षादूहिन्यामुपसंख्यानम्'**

अर्थात् अक्षशब्दाद् ऊहिनीशब्दे परे वृद्धिरेकादेशः स्यात् । यथा-

अक्ष + ऊहिनी = अक्षौहिणी।

**सूत्रम्- 'स्वादीरेरिणोः'**

अर्थात् स्वशब्दाद् ईरशब्दे ईरिन्शब्दे च परे वृद्धिरेकादेशः स्यात्। यथा-

स्व + ईरः = स्वैरः। स्व + ईरिन् = स्वैरी। स्व + ईरिणी = स्वैरिणी।

**सूत्रम्- 'प्रादूहोढोढ्येषैष्येषु' (वा)**

अर्थात् प्र इत्युपसर्गाद् ऊह, ऊढ, ऊढि, एष, एष्य इत्येतेषु परेषु वृद्धिरेकादेशः स्यात्। यथा-

प्र + ऊहः = प्रौहः। प्र + ऊढः = प्रौढः।
प्र + एषः = प्रैषः। प्र + ऊढिः = प्रौढिः।

---

४. अष्टाध्यायी- १/१/१
५. अष्टाध्यायी- ६/१/८८
६. अष्टाध्यायी- ६/१/९२
७. अष्टाध्यायी- ६/१/९१

**सूत्रम्- 'प्रवत्सतरकम्बलवसनदशार्णानामृणे' ( वा )**

अर्थात् प्र, वत्सतर, कम्बल, वसन, दश, ऋण इत्येतेभ्यः ऋणशब्दे परे वृद्धिरेकादेशः स्यात्। यथा-

प्र + ऋणम् = प्रार्णम्। वत्सतर + ऋणम् = वत्सतरार्णम्। कम्बल + ऋणम् = कम्बलार्णम्।

वसन + ऋणम् = वसनार्णम्। ऋण + ऋणम् = ऋणार्णम्। दश + ऋणः = दशार्णः।

**सूत्रम्- 'ऋते च तृतीयासमासे' ( वा )**

अर्थात् तृतीयासमासे अकाराद् ऋतशब्दे परे वृद्धिरेकादेशः स्यात्। यथा-

सुख + ऋतः = सुखार्तः। परम् + ऋतः = परमर्तः।

**४. यण्सन्धिः-**

**सूत्रम्- 'इको यणचि'**[८]

अर्थात् इकः स्थाने यण् स्यादचि संहितायां विषये।

इ, ई, उ, ऊ, ऋ, ॠ, लृ इत्येतेभ्यो वर्णेभ्योऽसवर्णे स्वरे परे 'इ,ई' इत्यनयोः स्थाने यकारः, उ,ऊ इत्यनयोः स्थाने वकारः, ऋ,ॠ इत्यनयोः स्थाने रकारः (रेफः), लकारस्य स्थाने लकारश्च आदेशो भवति। यथा-

१) यदि + अपि = यद्यपि। २) पठतु + एकः= पठत्वेकः।

इति + आह = इत्याह। अनु + अयः = अन्वयः।

३) मातृ + ए = मात्रे। ४) लृ + आकृतिः= लाकृतिः।

धातृ + अंश = धात्रंशः।

**५. अयादिसन्धिः-**

**सूत्रम्- 'एचोऽयवायावः'**[९]

अर्थात् 'ए, ऐ, ओ, औ' इत्येतेभ्यो वर्णेभ्यः स्वरे परे एकारस्य स्थाने अय्, ऐकारस्य स्थाने आय, ओकारस्य स्थाने अव्, औकारस्य स्थाने आव् च आदेशो भवति।

१) हरे + ए = हरये। (२) भो + अति = भवति।

ने + अनम् = नयनम्। पो + अनः = पवनः।

(३) नै + अकः = नायकः। ४) पौ + अकः = पावकः।

गै + अकः = गायकः। भौ + अकः = भावकः।

**विशेषः-**

**सूत्रम्- 'वान्तो वि प्रत्यये'**[१०]

अर्थात् यकारादिप्रत्यये परे ओ,औ इत्येतयोः स्थाने क्रमाद् अव्, आव् एतौ आदेशौ भवतः। यथा-

गो + यम् = गव्यम्। नौ + यम् = नाव्यम्।

---

८. अष्टाध्यायी- ६/१/७७
९. अष्टाध्यायी- ६/१/७९
१०. अष्टाध्यायी- ६/१/७८

**सूत्रम्- 'लोपः शाकल्यस्य'** [११]

अर्थात् पदान्ते विद्यमानानाम् 'ए, ऐ, ओ,औ' इत्येतेषां वर्णानां क्रमाद् अय् आय् अव् आव् एते आदेशाः यदा भवन्ति तदा यकारस्य वकारस्य च विकल्पेन लोपो भवति। लोपे कृते पुनः सन्धिः न करणीयः। यथा-

१. हरे + आगच्छ = हरयागच्छ / हर आगच्छ। (सवर्णदीर्घः न)

२. तस्यै + इदम् = तस्यायिदम् / तस्या इदम्। (गुणसन्धिः न)

३. गुरो + आदिश = गुरवादिश / गुर आदिश। (सवर्णदीर्घः न)

**६. पूर्वरूपसन्धिः-**

**सूत्रम्- 'एङः पदान्तादति'** [१२]

अर्थात् पदान्ताद् एकाराद् अकारे परे एकारः, पदान्ताद् ओकाराद् अकारे परे ओकारः च पूर्वपरयोः स्थाने एकादेशो भवति। यथा-

(१) हरे + अव = हरेऽव। लोके + अस्मिन् = लोकेऽस्मिन्।

(२) विष्णो +अव = विष्णोऽव। रामो + अधुना = रामोऽधुना।

**७. पररूपसन्धिः-**

**सूत्रम्- 'एङि पररूपम्'** [१३]

अर्थात् अवर्णान्तादुपसर्गाद् एकारादौ धातौ परे 'एकारः', ओकारादौ धातौ परे 'ओकारः' पूर्वपरयोः स्थाने एकादेशो भवति। वृद्धेरयम् अपवादः। यथा-

प्र + एजते= प्रेजते। उप + ओषति = उपोषति।

**विशेषः-**

**सूत्रम्- 'एत्येधत्यूठ्सु'** [१४]

अर्थात् एकारादौ इण्धातौ एध्धातौ च परे पररूपं न। किन्तु वृद्धिरेव (ऐकारादौ तु पररूपप्राप्तिरेव नास्ति। अतो वृद्धिः स्वयं सिद्धा) यथा-

उप + एति = उपैति। प्र + एधते = प्रैधते ।

सूत्रम्- 'शकन्वादिषु पररूपं वाच्यम्' (वा)। यथा-

शक + अन्धुः = शकन्धुः। कर्क +अन्धुः = कर्कन्धुः।

**सूत्रम्- सीमन्तः केशवेशे ( वा )।**

सीमा + अन्तः =सीमन्तः।

सूत्रम्- ओत्वोष्ठयोः समासे (वा)।

अर्थात् अवर्णान्तात् ओतुशब्दे ओष्ठशब्दे च परे पररूपं विकल्पेन भवति समासे एव। यथा-

---

११. अष्टाध्यायी- ८/३/१९

१२. अष्टाध्यायी- ६/१/१०९

१३. अष्टाध्यायी- ६/१/९४

१४. अष्टाध्यायी- ६/१/८९

स्थूल + ओतुः = स्थूलोतुः/स्थूलौतुः।                    बिम्ब + ओष्ठः = बिम्बोष्ठः/बिम्बौष्ठः।

**सूत्रम्- 'ओमाङोश्च'**[१५]

अर्थात् ओमि आङि च आत्परे पररूपमेकादेशः स्यात्।

शिवाय + ओं नमः।

शिवाय् + ओं + नमः= शिवायों नमः।

शिव + आ + इहि

शिव + (ए + हि) एहि - गुणसन्धिः

शिव + एहि (अत्र एकारे आत्वमस्तीति विभावनीयम्)

शिव् + ए + हि = शिवेहि।

**सूत्रम्- 'अन्तादिवच्च'**[१६]

अर्थात् योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत्स्यात्। यथा-

अद्य + आ + ऊढा

अद्य + (ओ+ ढा) ओढा (गुणः)

अद्य + ओढा

अद्य + ओ + ढा = अद्योढा (अ+ ओ (आङ्) =ओ)

**८. प्रकृतिभावसन्धिः -**

**सूत्रम्- 'प्लुतप्रगृह्या अचि नित्यम्'**[१७]

अर्थात् प्लुतस्य स्वरे परे नित्यं प्रकृतिभावो भवति। प्लुतः कुत्र प्रयोक्तव्यः इति शास्त्रेणैव ज्ञातव्यम्। प्लुतविधायकानि सूत्राणि बहूनि सन्ति। तेषु एकस्यैवार्थोऽत्र दीयते। तथाहि -

**सूत्रम्-'दूराद्धूते च'**[१८]

अर्थात् दूरात्सम्बोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्। वाक्यस्यान्ते यत्र सम्बोधनं भवति तत्रैव अयं प्लुतः। प्लुतः वाक्यसम्बन्धीत स्मरणीयम्। यथा-

गच्छ गौरि३ + असौ तत्रास्ति = गच्छ गौरि ३ असौ तत्रास्ति।

**प्रगृह्यप्रकृतिभावः-**

प्रगृह्यस्य स्वरे परे नित्यं प्रकृतिभावो भवति।

**सूत्रम्- 'ईदुदेद्द्विवचनं प्रगृह्यम्'**[१९]

---

१५. अष्टाध्यायी- ६/१/९५

१६. अष्टाध्यायी- ६/१/८

१७. अष्टाध्यायी- ६/१/१२५

१८. अष्टाध्यायी- ८/२/८४

१९. अष्टाध्यायी- १/१/११

२०. अष्टाध्यायी- १/१/१२



अर्थात् ईकारान्तं ऊकारान्तं एकारान्तं च द्विवचनं प्रगृह्यं भवति । यथा–

गुरू + इमौ = गुरू इमौ। लते + एते = लते एते।

अर्थात् 'अमी' इत्यस्य ईकारः प्रगृह्यः भवति। यथा–

अमी + आश्रमाः = अमी आश्रमाः।

**सूत्रम्– 'ओत्'[२०]**

अर्थात् ओकारान्तम् अव्ययम् आ इत्यव्यय (आङ् इति, आ इति द्वेस्ततः, तयोर्मध्ये आ इत्यव्ययमेव) प्रगृहां भवति। यथा–

अहो + अत्रभवान् = अहो अत्र भवान्। (नात्र पूर्वरूपम्।)

**–ज्योतिषविभागः**

**श्री ला० ब० शा० रा० सं० विश्वविद्यालयः**

**नव देहली–११००१६**

drsav1008@gmail.com

२१. अष्टाध्यायी– १/१/१५

# शठेन शाठ्यम्

-डॉ. केशवरामशर्मः



पात्रपरिचयः

१. रत्नसिंहः - मेवाडनरेशः।
२. अलाउद्दीनः 'खिलजी' - दिल्लीश्वरः।
३. नसरत खाँ - अलाउद्दीनस्य सेनापतिः।
४. विजयसिंहः - रत्नसिंहस्य प्रधानमन्त्री।
५. गौरासिंहः - रत्नसिंहस्य सेनापतिः।
६. बादलसिंहः - रत्नसिंहस्य सेनापतिः।
७. पद्मिनी - रत्नसिंहस्य पट्टमहिषी ।
८. एका सेविका।

## अथ प्रथमं दृश्यम्

[चित्तौडदुर्गं परितोऽलाउद्दीनस्य सैनिकाः शिविरेषु सन्नद्धास्तिष्ठन्ति। एकस्मिन्शिविरेऽअलाउद्दीनः स्व सेनापतिनसरतेन सह चिन्तामग्नो विराजते ।]

**अलाउद्दीनः**- पञ्चमासानि व्यतीतानि। दुर्गस्तथैव तिष्ठति क्षत्रियवीराश्च योद्धुं तत्परा निर्भीका यत्र-तत्र दुर्गरक्षार्थं नियुक्ताः सतर्का विचरन्ति।

**नसरत खाँ**-आम्, श्रीमन्! गुप्तचरैर्निवेदितं यद्दुर्गे वर्षं यावत् पर्याप्ता खाद्यसामग्री अस्ति। आवश्कपदार्थानां सञ्चयोऽपि तथैवाऽस्ति।

**अलाउद्दीनः** - अत्यन्तपीडाजनकमिदम्। व्रणस्योपरि स्फोटमिदं यद्वर्षर्तुरागन्तुमिच्छति।
इन्द्रप्रस्थतः प्राप्तसमाचारा अप्युद्वेगकरा एव सन्ति। इयं पद्मिनी मे जीवनस्य कालनिशा मा स्यादेतन्निमित्तमस्माभिः प्रयासः करणीयः।

**नसरत खाँ**- यदीन्द्रप्रस्थादपि समाचाराः प्रतिकूलास्तर्ह्यत्र विलम्बो नोचितः।

**अलाउद्दीनः**- अस्त्येका युक्तिः। त्वं रत्नसिंहायैकं पत्रं लिख।

**नसरत खाँ**- कीदृशं पत्रम्? किं सन्धिप्रस्तावं प्रेषयितुमिच्छति भवान्?

**अलाउद्दीनः**- आम्, क्षत्रियाः संकल्पेदृढाः सत्यनिष्ठापराः स्ववचनस्यरक्षका अतो मूर्खा भवन्ति।

**नसरत खाँ**- किमुच्यते भवता ? ते मूर्खाः कथं भवन्ति?

**अलाउद्दीनः**- भविष्यन्ति मूर्खा एव। अहं रत्नसिंहेन सह मित्रताया नाटकं करोमि। चतुर्भिः सैनिकैः सह दुर्गं प्रविश्य तस्याऽऽतिथ्यं गृह्णामि। धर्ममूढा राजपुत्रा अस्माकं किमप्यहितं न करिष्यन्ति। तेन सह यत्किञ्चिदपि मिथ्या शान्तिप्रस्तावं कृत्वाऽहं तस्य हृदयमाशान्वितं करिष्यामि। सञ्जातप्रत्ययः स ममानुरोधेनाऽस्माकं शिविरेऽप्यातिथ्यग्रहणार्थमागमिष्यति। अहं तस्य ममानुकूलमेवाऽऽतिथ्यं करिष्यामि।

**नसरत खाँ**– प्रथम: कल्प:। तस्य निगडबन्धनादस्माकं कार्यमविलम्बेन सिद्धं भविष्यति।

**अलाउद्दीन:**–इदमेव समीचीनम्। लिखतु भवानेतद्विषयकं पत्रम्। यदि तेभ्य: सन्धिप्रस्तावो रोचते तदा स्वपताकाया: समीपमेवाऽस्माकं ध्वजोऽप्यचिरेण प्रीतिसूचक: प्रसारणीय:। आत्मध्वजस्य सम्मानं दृष्ट्वा वयं तेषामातिथ्यग्रहणार्थं सन्धिपत्रयोरादानप्रदानार्थञ्च दुर्गद्वारं गमिष्याम:। तत्पश्चादस्माकं सम्मानं तेषां कर्तव्यं भविष्यति।

**नसरत खाँ**– अत्युत्तम:। भवन्मुद्राङ्कितमेतत्पत्रं लब्ध्वा राजपुत्रा हर्षातिरेकविह्वला भविष्यन्ति। कथञ्च प्रेषणीयमिदं पत्रम्?

**अलाउद्दीन:**–वाणाग्रबद्धमिदं श्वेतपत्रमहं स्वयमेव दुर्गस्योपरि क्षेप्स्यामि।

**नसरत खाँ** – एष अहमचिरेण पत्रं लिखामि।

[पटाक्षेप:] इति प्रथमं दृश्यम्।

## अथ द्वितीयं दृश्यम्

[चित्तौड़दुर्गे सम्राड्रत्नसिंह: स्वेष्टमित्रै: सह विचारमग्नस्तिष्ठति। एकस्सैनिकोऽलाउद्दीनस्य पत्रेण सह द्वारमागच्छति।]

**प्रतिहार:**– जयतु महाराज:। श्रीमन्नेक: सैनिक: शत्रो: पत्रेण सह प्रवेशमिच्छति।

**रत्नसिंह:** – किं शत्रोरलाउद्दीनस्य पत्रेण सह? प्रवेशय तम्।

**सैनिक:**– [प्रविश्य] जयतु महाराज:। वाणाग्रबद्धमिदं शत्रो: पत्रमिदानीमेवागतम्। [पत्रं समर्पयति]

**रत्नसिंह:**– [पत्रं पश्यन्] मुद्रा त्वलाउद्दीनस्यैव अस्ति। [प्रधानामात्याय पत्रं दत्त्वा] पठतु भवान्।

**विजयसिंह:**–[पत्रं पठति] स्वस्ति। श्रीमहाराजाधिराजरत्नसिंहमलाउद्दीन: सादरं प्रणमति।

श्रीमन्! अहं भवतां शौर्येणाऽतीवप्रसन्नोऽस्मि। अहं पञ्चमासपर्यन्तं भवद्भ्य: कष्टकारणमासमेतद्विचार्य लज्जितोऽस्मि। इदानीमहं भवद्भि: सह मित्रत्वमिच्छामि। यदि भवद्भ्यो रोचते तदाऽऽत्मनां स्नेहसूचकमस्माकं ध्वजमपि स्वध्वजेन सह प्रसारयन्तु। आत्मनो ध्वजस्य सम्मानं दृष्ट्वाऽहं चतुर्भि: सैनिकै: सह दुर्गद्वारमागमिष्यामि। भवतां दुर्ग एव सन्धिप्रस्तावानामादानप्रदानं भविष्यति।भवतां प्रजया सह कुशलमिच्छामि। पुनरपि प्रणमामि भवन्तम्।



भवतां शुभाकांक्षी

अलाउद्दीन: 'खिलजी'।

**रत्नसिंह:**– कथमेतत्संवृत्तम्? प्रबलशत्रु: स्वयमेव सन्धिवार्तामिच्छति।

**गौरासिंह:** – इदमस्माकं यज्ञानुष्ठानस्य फलमस्ति। अपरञ्च। अलाउद्दीन: स्वेन्द्रप्रस्थराज्यं प्रति चिन्तातुरोऽस्ति।

अस्माभि: सह सन्धिवार्तां कृत्वा स स्वदेशं प्रत्युत्कण्ठितोऽस्ति।

**विजयसिंह:**–इदमेवाऽस्ति कारणम्। अन्यथा स मूढो रजकस्य कुक्कुरो भविष्यति।

**रत्नसिंह:**– अस्तु। यदि भवद्भ्यो रोचते, तर्हि तेषां ध्वजस्य निर्माणं कृत्वा पत्रोक्तप्रकारेण व्यवहराम:।

**सर्वे**– अस्मिन्विषये सन्देहस्य किमपि कारणं नास्ति।

**[पटाक्षेप:] इति द्वितीयं दृश्यम्।**

## अथ तृतीयं दृश्यम्

[चित्तौडदुर्गस्यैकस्मिन्कक्षे सम्राड्रत्नसिंहो विजयसिंहो गौरासिंहोऽलाउद्दीनो नसरतश्च प्रसन्नमुखास्तिष्ठन्ति।]

**अलाउद्दीनः**:- अहं भवतां शौर्येणाऽनेनाऽऽतिथ्येन चातीव प्रसन्नोऽस्मि। आवयोर्मैत्री चिरस्थायिनी स्यात्।

**रत्नसिंहः**:- अहमप्यभिलषामि दृढमैत्रीं भवद्भिः सह।

**अलाउद्दीनः**:- भवान्निश्शङ्को भूत्वा स्वराज्यसञ्चालनं कुरु। अहं भवतां सर्वथैव श्रीवृद्धिमिच्छामि।

**रत्नसिंहः**:- भवेदावयोर्मध्ये लिखितमैत्रीप्रस्तावो येनेयं मैत्री दृढतरा स्यात् ।

**अलाउद्दीनः**:- अहं भवतो मङ्गलमिच्छामि। लिखतु भवान्यत्किमपि भवते रोचते।

**विजयसिंहः**:- आवयोर्देशयोर्या सीमाद्यारित तस्योल्लेखः करणीयस्तस्यातिक्रमणं मा भवेत्।

**गौरासिंहः** - अन्येन सह युद्धे समुपस्थिते परस्परसाहाय्यं करणीयम्।

**अलाउद्दीनः**:- भवतां सर्वे समयाः समीचीनास्सन्ति। अहं प्रस्तुतोऽस्मि। लिखन्तु भवन्तः सर्वानिमान्प्रस्तावान् ।

**विजयसिंहः**:- [गौरासिंहं प्रति] आगच्छतु भवान्मम पार्श्वे।

**गौरासिंहः**:- [उत्थाय विजयसिंहं निकषा गच्छति। एषोऽस्म्यहं, लिखतु भवानिदानीम्।

[विजयसिंहस्तस्य परामर्शेन लिखिति।]

**रत्नसिंहः**:- किमद्यैव गमिष्यति भवान्? श्वः प्रत्यूषे गमनमुचितं भविष्यति।

**अलाउद्दीनः**:- दिवसत्रयं यातमिदानीं मया गन्तव्यमेव। श्व इन्द्रप्रस्थं प्रति प्रस्थानं करिष्यामि।

**विजयसिंहः** -[अलाउद्दीनाय पत्रं दत्त्वा] पश्यतु भवान्, इदं सन्धिपत्रस्य प्रारूपमस्ति।

**अलाउद्दीनः**:- [पत्रं गृहीत्वा पठति] प्रथमदृष्ट्या सर्वमेव समीचीनं प्रतीयते। [नसरतं प्रति] भवानाभ्यां सह मिलित्वाऽस्य पत्रस्य सम्यग्निरूपणं कृत्वाऽस्य द्वे प्रतिलिपी करोतु ।

**नसरत खाँ**- यथाऽऽज्ञापयति भवान्। [पत्रं गृहीत्वा विजयसिंहस्य समीपं गच्छति।]

**रत्नसिंहः** - एषास्ति मम मुद्रा। [विजयसिंहाय ददाति]

**अलाउद्दीनः**:- मम मुद्रा तु शिविरे मञ्जूषायां विद्यते। अहं तत्रैव तस्याऽङ्कनं कृत्वा भवते दास्यामि।

**रत्नसिंहः**:- तस्यार्थं कमपि विश्रब्धं सेवकं शिविरं प्रति प्रेषयतु भवान्।

**अलाउद्दीनः**:-यथा मयात्रागत्य भवत आतिथ्यं गृहीतं, किं भवांस्तथैव मया सह मम शिविरं न गमिष्यति? तत्रैव पत्रयोरादानप्रदानं भविष्यति।

**रत्नसिंहः**:- [विजयसिंहस्य मुखमवलोकयति।]

**विजयसिंहः**:- मित्रस्यातिथ्यं स्वर्गतुल्यं सुखदं भवति। अहं महाराजेन सह भवतां शिविरे गमिष्यामि।

**रत्नसिंहः**:- सत्यमिदम्।

**सन्मित्रं दुर्लभं लोके बान्धवाः सन्ति कोटिशः।**
**यथा चन्द्रस्तमो हन्ति तथैव मित्रमापदः॥**

अहं भवत आतिथ्यं स्वीकरोमि। क्षत्रिया वाग्धना भवन्ति।

**अलाउद्दीनः**:- वयमपि तथैव स्मः।

[पटाक्षेपः] इति तृतीयं दृश्यम् ।

## अथ चतुर्थं दृश्यम्

[चित्तौडदुर्गस्यैकस्मिन्कक्षे विजयसिंहो गौरासिंहो बादलसिंहश्च म्लानमुखास्तिष्ठन्ति।]

**विजयसिंहः**:- हा धिक्! वयं लुण्ठितास्स्मः। दुष्टयवनैरस्माभिः सह विश्वासघातः कृतः। तेन म्लेच्छकुल-कलङ्केन तथा मित्रताया आडम्बरं कृत्वा, मधुरसम्भाषणेन मिथ्याविनीतभावेनाऽस्मान्सर्वान्विमोह्य मया सह महाराजस्तत्र नीत्वा निगडबद्धः कृतः।

**गौरासिंहः**:- धिग्दुष्टान्। अननुभूतदुःखस्य निगडबद्धस्य महाराजस्य का दशा भवेत्। तैर्भवता सह कीदृशो व्यवहारः कृतः?

**विजयसिंहः**:- भूपालस्य निग्रहं कृत्वा अलाउद्दीनेनाऽहमुक्तः-'गच्छ स्वदुर्गम्। कथय पद्मिनीं यदि स्वस्वामिनं जीवितमिच्छति तर्हि सा मम भार्या भवेत्। अहं तस्याश्चरणपद्मयोरसीमवैभवं समर्पयिष्यामि। रत्नसिंहेन सह मम मैत्रीत्थमेव दृढत्वं यास्यति। यदि दिवसत्रयमध्ये पद्मिनी मम शिविरं नागच्छति तर्हि राज्ञो जीवनान्तस्य कारणं सैव भविष्यति।

**बादलसिंहः**:- [सरोषम्] का प्रतीक्षा दिवसत्रयस्याऽहमद्यैव तस्य दुष्टयवनकुलाङ्गारस्य जीवनान्तस्य कारणं भवामि।

**गौरासिंहः**:- अलं रोषेण। नायमवसरोऽतीवोत्साहस्य। इदं कार्यन्तु अत्रैव सुकरमासीत्, किन्तु वयम्स्मो धर्मपरायणाः शरणागतरक्षका वचनवद्धाश्च।

**बादलसिंहः**:- ते च सन्ति, अधर्माः शरणागतभक्षका मिथ्याचारकुशलाश्च। इदानीमहं शठने शाठ्यं चरामि।

**विजयसिंहः**:- भवान्किमिच्छति? स्व मन्तव्यं स्पष्टं कुरु। कथं भवान्तस्य नराधमस्य समीपं गमिष्यति?

**बादलसिंहः**:- अहं यवनरूपं धृत्वा ऐन्द्रजालिकरूपेण तस्य शिविरे प्रविश्य यथातथा तस्य समीपं गत्वा निर्भीकेनैकेनैव प्रहारेण तं यमसदनं नेष्यामि, तदनन्तरं नाहं जीवनस्याऽभिलाषी।

**विजयसिंहः**:- परमकठिनमेतन्न च युक्तियुक्तम्। इत्थं यदि भवान्सफलमपि भवति तदाऽऽत्मनो महाराजस्य च प्राणान्संकटापन्नान्करिष्यति।

**गौरासिंहः**:- नोचितमिदं किन्तु शठेन शाठ्यमवश्यमेव भवेत्। [साम्राज्ञी पद्मिनी सहसा प्रविशति। एकानुचर्यपि तामनुसरति। सर्वे उत्थाय साम्राज्ञीं प्रणमन्ति। सा आसनं गृह्णाति, तदनन्तरं सर्वे यथास्थानं तिष्ठन्ति।]

**पद्मिनी**- अहमलाउद्दीनस्य शिविरं गच्छामि। स्वामिनं ततो दुर्गं प्रति प्रेष्य, अहं तं दुष्टद्यैव यमलोकं नेष्यामि, तदनन्तरञ्च करिष्याम्यात्मनिधनम्। नाहमभिलषामि पतिविहीनं क्षणार्द्धस्यापि जीवनम्।

[अचेता भवति। सेविका शीतलजलेनोपचारं करोति ।]

**विजयसिंहः**:- दुर्दैवादलाउद्दीनरूपेण महती विपदाऽऽगता। यद्यपि वयं सर्वे प्राणांस्त्यक्तुमप्युद्यतास्तथापि मोक्षमार्गं न पश्यामः।

**पद्मिनी**- (संज्ञां लब्ध्या] अहं तस्य दुष्टस्य शिविरं प्रति गन्तुमुद्यताऽस्मि एतदर्थं भवन्तः शीघ्रं यतध्वम्।

**विजयसिंहः**-[सकरबद्धम्] क्षमाप्रार्थनापूर्वकमहं निवेदयामि, यद्भवत्यास्तत्र गमनं न युज्यते। अस्माकं जीविते सति भवती तत्र कथं गच्छेत्? अपरञ्च। स दुष्टो यद्यनायासेन भवतीं तत्र प्राप्नोति, तदापि महाराजं न मोक्ष्यति। भवती च तस्य समीपं तदा पर्यन्तं गन्तुं समर्था न भविष्यति यावत्स भवत्याः स्नेहस्य परीक्षणं न करोति।

**गौरासिंहः**- अस्त्येका युक्तिः। [सेविकां प्रति] भवती कियत्कालपर्यन्तं बहिष्तिष्ठ। [सा तथा करोति] स्वामिन्या वेशेणैकं क्षत्रिययोद्धारं प्रेषयामः।

**विजयसिंहः**-कथमेकमेव, दासीरूपेणाप्यन्येषां प्रेपणं भवेत् ।

**बादलसिंहः**- स्वामिन्या रूपेणऽहं गमिष्यामि। भवतु मे संकल्पस्य पूर्तिः।

**गौरासिंहः**- भवांस्तु योद्धृरूपेणैव गमिप्यति। स्वामिन्याः स्वरूपभिनेता गोपालो धारयिष्यति।

**बादलसिंहः** दासीरूपेण गच्छतु योद्धृसप्तशतकम्।

**विजयसिंहः**-अत्युत्तमः परामर्शः। प्रतिशिविकानिमित्तं षड्-षड्वाहका अपि योद्धार एव भविष्यन्ति।

**गौरासिंहः**- तेषामग्रतः पृष्ठत उभयतश्च रक्षकाः पञ्चसहास्रऽश्वारोहिणो भवेयुः। इत्थमस्माकं पदातिसैनिका अश्वारोहिणश्च पर्याप्तसंख्यका भविष्यन्ति।

**बादलसिंहः**-शिविकावाहकसैनिकानामस्त्रशस्त्राणि शिविकामध्ये गुप्तानि सन्तु। अहं भविष्यामि तेषां नायकः।

**गौरासिंहः**- आम्। अहमश्वानीकेन सह महाराजं सुरक्षितमत्रानयिष्यामि । भवतां जीवनं संकटापन्नं भविष्यति ।

**बादलसिंहः**-किमपि भवेत्। वयं तस्य दुष्टस्य शिक्षणाय समर्था भविष्यामः। [विजयसिंहं प्रति] लिखतु भवानेत-द्विषयकं पत्रम्।

**विजयसिंहः**- आम्। अहं पत्रं लिखामि। [पद्मिनीं प्रति] भवति। किमाज्ञापयति?

**पद्मिनी**- ईश्वरो भवतां रक्षतु। भवेदुष्टानां विनाशम्। शीघ्रमेव पन्त्रं लिखतु भवान् ।

[विजयसिंहस्तथा करोति।]

**बादलसिंहः**- पत्रस्य प्रेषणं कथं भविष्यति?

**गौरासिंहः**- तथैव बाणाग्रबद्धं पत्रं वयमपि क्षेप्स्यामः तथैव चोत्तरस्यापि प्रतीक्षां करिष्यामः।

**पद्मिनी**- पत्रे लिखतु भवान् यत्शिविकानां दुर्गद्वाराद्बहिर्गमनं महाराजस्य मोक्षकारणं भवेत्। इतः शिविकानां गमनं तत्तो महाराजस्य दुर्ग प्रत्यागमनं भवेत्। मार्गमध्ये आवयोर्मेलनं भविष्यति। शिविकारक्षका-श्वारूढसैनिकेभ्य इतरेऽस्माकं सैनिका दुर्गे स्थास्यन्ति। यवनसैनिका अपि तथैव दूरे तिष्ठन्तु।

**गौरासिंहः**- शिविकानां परीक्षणं भूपालः स्वयं तस्य सेनापतिर्वा कर्तुमर्हति। अस्माकं स्वामिन्यन्यैः सह संलापं न करिष्यति। मार्गे तस्याः प्रथमं सम्भाषणं महाराजरत्नसिंहेन भवितव्यम्। सा तस्मै मञ्जूषायास्तालिकं दत्त्वा, आत्मनोऽन्तिमं प्रणामं निवेद्य च भवतः समीपं गमिष्यति।

**बादलसिंहः**- इदं पत्रं प्राप्य दुष्टोऽलाउद्दीनस्तथोल्लसितो भविष्यति, यत्स शीघ्रमेवाऽ स्माकं पाशे पतिष्यति।

**गौरासिंहः**- यद्यस्मिन्युद्धे स कामुको दुवृत्तो मिथ्याचारी मृतः स्यात्तदाऽस्माकं श्रमः सार्थको भवेत्।

विजयसिंहः– [पद्मिनीं पत्रं दत्त्वा] पश्यतु भवति! यदीदं पत्रं भवत्यै रोचते तर्ह्यस्य क्षेपणं भवेत्।

पद्मिनी– [स्वगतं पत्रं पठति] शोभनमिदम्। [गौरासिंहाय पत्रं ददाति] पश्यतु भवानपीदं पत्रम्।

गौरासिंहः– [पत्रं गृहीत्वा आत्मगतमेव पठति।] अति सुन्दरं क्षिपतु इदम्।

[विजयसिंहाय पत्रं ददाति। स वाणाग्रबद्धं कृत्वा इदं क्षिपति।]

विजयसिंहः– [गौरासिंहं प्रति] इदानीं शिविकानां व्यवस्था करणीया। सैनिकानामुचितशिक्षणमप्यावश्यकमस्ति।

गौरासिंहः– सैनिकास्तु सन्नद्धास्तिष्ठन्ति। [बादलसिंहं प्रति] भवान्तेषामुचितशिक्षणं कुरु। अहं शिविकानां व्यवस्थां करोमि। [गौरासिंहो बादलसिंहश्च बहिर्गच्छतः।]

विजयसिंहः– [पद्मिनीं प्रति] स्वपत्रस्य प्रतिक्रियां ज्ञातुमावाभ्यां कक्षाद्बहिर्गन्तव्यम्। [तथा कुरुतः]

विजयसिंहः– [दूरदर्शकयन्त्रेण पश्यन्] अलाउद्दीनः स्वयं पत्रं पठति। तेन तत्पत्रमिदानीं नसरताय दत्तम्। प्रसन्नवदनोऽलाउद्दीनो हसति तथैव नसरतोऽपि स्व प्रसन्नतां ज्ञापयति। नसरतः पत्रोत्तरं लिखति। इदानीमविलम्बेन भवती पत्रं प्राप्स्यति।

पद्मिनी– स्वामिनो मुखमदृष्ट्या एकदिवसमपि युगमिव प्रतीयते।

द्वारपालः – [सहसा प्रविश्य] जयतु स्वामिनी। शराग्रबद्धमिदं पत्रमस्ति। [पत्रं ददाति]

पद्मिनी – [आत्मगतं पत्रं पठित्वा] तेन सर्वमपि स्वीकृतं तथाप्यस्माभिर्विशेषकौशलेन कार्यं सम्पादनीयम्। [पत्रं विजयसिंहाय ददाति।]

विजयसिंहः– [आत्मगतं पत्रं पठित्वा] अहं बादलसिंहं गौरासिंहञ्च सर्वं निवेदयामि। [बहिर्गच्छति]

[कियत्कालानन्तरं विजयसिंहः पुनः साम्राज्ञ्याः समीपमागच्छति।

विजयसिंहः– [एकं दूरदर्शकयन्त्रं साम्राज्ञ्यै यच्छति।] पश्यतु भवती। अस्माकं योजना साफल्यं याति।

पद्मिनी – [दूरदर्शकयन्त्रेण पश्यन्ती] पश्यामि यवनसैनिकैः उभयतो धृतं महाराजम्। धिगिदं किं पश्याम्यहम्। एष महाराजः पदातीत आगच्छति। यवनसैनिकास्तथैव तमुभयतः सन्ति।

विजयसिंहः– एष नसरतो बादलसिंहेन सह वार्तालापं करोति। बादलसिंहस्तं तत्र नयति यत्र शिविकायां साम्राज्ञीरूपेण गोपालस्तिष्ठति। नसरतः शिविकां प्रति दत्तकर्णोऽस्ति।

पद्मिनी– किमिदम्? महाराजस्तु तस्यां शिविकायां प्रविष्टः। एष पुनर्बहिरागत्याऽश्वारूढो भवति। प्रारब्धमिदानीं यवनैस्सह भीषणयुद्धम्।

विजयसिंहः– अकस्मादेव बादलसिंहेन एष नसरतो हतः। अन्ये यवनसैनिकाः पलायिताः। पुनर्यवनानामश्वानीकं प्रत्याक्रमणं करोति। प्रवृत्तो घोरयुद्धः। महाराजोऽ श्वारूढो दुर्गद्वारं तिप्ठति। एष महाराजः सैनिकैः सहागच्छति।

**पद्मिनी**- गच्छामस्तस्य स्वागतार्थम्। [पुरस्ताद्दृष्ट्वा] दिष्ट्या महाराजः सकुशल इत एव आगच्छति।

**रत्नसिंहः**- भवतां कौशलेनाऽहं सकुशलमागतोऽस्मि। कष्टमिदं यन्मम शताधिकसैनिका अस्मिन्युद्धे वीरगतिं प्राप्ताः। [पद्मिनीं प्रति] भवति! कथमसि?

**पद्मिनी**- भवतां दर्शनेन पुनर्जीविताऽस्मि। [भूपालस्तामालिङ्गति।]



[पटाक्षेपः]

**इति चतुर्थं दृश्यम्।**

समाप्तमिदं शठेन शाठ्यं नामलघुनाटकम्।

**-बी-५९, मार्ग सं.-३**
**उत्तरी छज्जूपुरम्, शाहदरा**
**देहली-९५**

## सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347-1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड- IBKL 0000170 (IDBI BANK- Preet Vihar) में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित